8) Ghanaśyāma of Tanjore: He refers to his commentary in the Introductory verse No. 15 of his commentary (ascribed to his wife) on the *Viddhaśālabhañjikā* (Tanjore Cat. No. 54678).

9) Pramukhasukavi (?) : His commentary is said to be in the Bikaner Library in S. R. BHANDARKAR's report on the Mss. in Rajasthan and Central India, p. 51. But later Bikaner Catalogues have no such manuscript.

10) Premarāja : B. O. R. I., No. 181 of 1879–80.

11) Baladeva or Kulabaladeva : B. O. R. I. No. 386 of 1887–91.

12) Mādhava Bhaṭṭa (Yajvan), son of Maṇḍala Bhaṭṭa. He wrote the commentary at the instance of Kṛṣṇadāsa of Mihir family. Madras Government Oriental Ms. Library, R. 3778. Trivandrum Curator's Office, Descriptive Catalogue 1439.

13) Vrajarāja Dīkṣita : Report of A. KATHWATE, No. 585.

14) Sādharaṇadeva : The name of his commentary is Muktāvali, India Office 7218. WEBER 1596. This author was the son of Malladeva and grandson of Vāmanadeva.

15) Īśvara : Tanjore Catalogue, p. 174b, notes a commentary by this author. This commentary records a legend

1) Pt. D. Malavania informs (his p. c. 26-6-70) me that there is a Ms. of this in the L. D. Institute, Ahmedabad.

about *Saptaśatī* which WEBER had noticed. Compare with this R. 23 of Madras G. O. M. Library.

16) Jahlanadeva : H. D. VELANKAR. *Jinaratnakośa*, p. 109.

17) Vemabhūpāla : *Saptaśatīsāraṭīkā*, Madras G. O. M. Library, R. 3394.

7. VEMA BHUPĀLA & HIS BHĀVADĪPIKĀ

Vema Bhūpāla, or Peda-komaṭi Vema-Bhūpāla or Vema-reḍḍi, succeeded Komāragiri on the throne of Kondavidu in *c.* 1403 A. D. [1]. He ruled for seventeen years and passed away sometime in 1420 A. D. He belonged to the Panṭakula. Prolla was the progenetor of this mighty race. Māca was his eldest son. Our Vema Bhūpāla was his grand son : he was a great warrior and had won the titles Vīra-Nārayaṇa and Jaganobbagaṃḍa. Besides, he was not only a patron of men of letters, but himself an author and scholar. His wife was Suramaṃbā who was known for her charity : some tanks and canals are associated with her name. Mallāmbikā from his family married Kāṭayavema, the famous Commentator. He patronised great poets like Śrīnātha and Vāmana Bhaṭṭa Bāṇa. This Vāmana Bhaṭṭa, like Bāṇa, the author of the *Kādambarī*, belonged to Vatsagotra, and looked upon himself as the incarnation of Bāṇa whom he had the ambition to emulate. Like Bāṇa glorifying his patron in his *Harṣacarita*, he wrote the romance, *Vīranārāyaṇa*-or *Vemabhūpāla-carita* which depicts 'situations full of poetic effusions in language at once melodious and expressive'. As a man of letters, Vema Bhūpāla has to his credit the *Sāhitya-cintāmaṇi* and *Saṃgīta-cintāmaṇi* dealing respectively with poetics and music. He wrote Sanskrit commentaries on the *Amaruśataka* and *Saptaśatīsāra.*

Vema Bhūpāla's *Saptaśatī-sāra-ṭīkā* is a commentary on a select Century of Gāthās from the *Sattasai* of Hāla. The name of the commentary is *Bhāvadīpikā*. Just as Hāla selected, in the past, seven hundred out of one crore of Gāthās (see *Gāthāsaptaśati* I. 3) so Vema-nṛpāla, as he himself says in the opening verse, selected one hundred even out of that seven hundred : that is his *Saptaśatīsāra*, and on that collection he has written a Sanskrit commentary

1) See M. Krishnamachariar : *History of Classical Sk. Literature* pp. 470 f., Madras 1937; also C. R. Devadhara : *Amaruśatakam*, Intro. pp. 29. f., Poona 1969.

which he calls in the concluding colophon *Bhavadīpikā*. By the use of *so 'yam* ' he possibly hints that he has inherited the personality of king Hāla just as his protege Vāmana claimed that he was an incarnation of Bāṇa Bhaṭṭa.

Though Vema Bhūpāla states that he has selected one hundred Gāthās from the Kośa of Hāla, his actual number, however, is 104. The selection of gāthās goes beyond the recension of Gaṅgādhara, and some of the readings, as found in our Mss., correspond to those in the Telugu Recension.

The number, accompanied by W, at the beginning of every Gāthā, in this edition, shows the number as found in WEBER's edition. Vema Bhūpāla first gives the Gāthā: then adds his Sanskrit *chāyā*; thereafter he explains the text often commenting on certain Prākrit words by quoting the authority of the Prākrit grammar; and lastly, the *alaṃkāra* and *dhvani* aspects are specially stressed. In fact it is the last item that constitutes the speciality of Vema Bhūpāla, who has made his commentary sufficiently exhaustive. Apart from the *vācyārtha*, he brings out the *vyaṅgyārtha* here and there. The Gāthās selected by him have a special significance from the point of poetics; and it will be seen that some of them are already discussed by Hemacandra.

Vema Bhūpāla draws his quotations from the *Amarakośa*, *Kāvyādarśa* of Daṇḍin, possibly also from the *Dhvanyāloka*, *Sarasvatīkaṇṭhābharaṇa* and the *Jayamaṅgalā* commentary on the *Kāmasūtra* of Vatsyāyana.[1] All his quotations for the explanation of Prākrit terms and forms are traced to the *Prākṛta-śabdānuśāsanam* of Trivikrama whose grammar has received greater popularity in different parts of South India.

* * *

---

1) See the Tables at the end of this edition.

Select Bibliography

1. *Āryāsaptaśati* (in Bengali script), ed. Somanātha MUKERJEE, Dacca, 1864. (R)

2. A. WEBER : *Ueber das Saptaśatakam des* Hāla, Leipzig 1870.

3. *Āryāsaptaśatī* (in Telugu types), with Ananta Paṇḍita's Comm., Arsha Press, Vizagapatam 1871. (R)

4. Ibidem, ed. Jīvānanda VIDYASAGARA, Kāvyasaṃgraha, pp. 376–442, Calcutta 1872; Ibidem 1886; with a full Comm., 1888. (R)

5. *Gāthāsaptaśati*: Malayalam Translation by VALLATHOL 1879.(R)

6. A. WEBER : *Das Saptaśatakam of Hāla*, Leipzig 1881.

7. *Āryāsaptaśatī* with Ananta's comm., *Vyaṅgyārthadīpana*, ed. DURGAPRASAD and K. P. PARAB, Kāvyamālā No. 1, N. S. Press, Bombay, 1st ed. 1886, 2nd ed. 1895.

8. The *Gāthāsaptaśatī* by Śātavāhana with the commentary of Gaṅgādhara-bhaṭṭa,ed. DURGAPRASADA and PANASHIKARA, Kāvyamālā 21, 1st ed. Bombay 1889. 2nd ed., Bombay 1911. 3rd ed., with Mathurānātha's Sanskrit commentary and metrical version, Bombay 1933.

9. R. PISCHEL : *Grammatik der Prākrit sprachen*, Strassburg 1900, § 13; English Translation, 2nd Ed., Delhi 1965.

10 *Bihari Sat Saī :* for details see GRIERSON : JRAS, 1909; F. E. KEAY : *A History of Hindi Literature*, pp. 42 f. Mysore 1920; NAGENDRA : First Anniversary Souvenir, Calcutta Āndhra Sāhitya Parishad, pp. 39 f.

11. M. WINTERNITZ : *Geschichte der Indischen Literatur*, Leipzig 1922, pp. 97 ff; English Translation, III, part i, pp.103 ff., Delhi 1965. For some more references about the study of the *Gāthāsaptaśatī*, see foot-note No. 2, p. 108 of the English translation.

12. A. B. KEITH : *A History of Sanskrit Literature*, Oxford 1928, pp. 223 ff.

13. *Gāthāsaptaśatī* : Telugu Translation of 395 verses by R. A. K. SHARMA, Prajotpatti (Bhādrapada) Sadhana Press, Anantapur 1931. (R)

14. A. M. GHATAGE : Māhārāṣṭrī Language and Literature, *Journal* of the University of Bombay, IV. 6, May 1936.

15. M. KRISHNAMACHARIAR : *History of Classical Sanskrit Literature*, Madras 1937.

16. Hāla's *Gāthāsaptaśatī* with Haritāmra Pītāmbara's Commentary (G.-prakāśikā), IV-VII, ed. J. L. SHASTRI, Lahore 1942.

17. A. N. UPADHYE : Prākrit Literature, *Encyclopedia of Literature*, I, New York 1946.

18. V.V. MIRASHI : The original name of the *Gāthāsaptaśati*, a paper submitted to the 13th All-India Oriental Conference, XIII, part II, pp. 370-74, Nagpur 1946.

19. S. N. DASGUPTA & S. K. DE : *A History of Sanskrit Literature*, Classical Period, University of Calcutta, Calcutta 1947.

20. K. SITARAMAYYA : Gāthāsaptaśatī and Mahārāṣṭrī Prākṛta, All India O. Conference,Summaries of Papers XIV, i, 71-73, Darbhanga 1948.

21. *Līlāvaī* of Koūhala, ed. by A. N. UPADHYE, 1st ed. Bombay 1949, 2nd ed. Bombay 1966.

22. *Gāthāsaptaśatī* : Telugu Translation of 310 verses by V. V. SUBBAYYA, Guntur 1950. (R)

23. *Gāthāsaptaśatīsāra* : Telugu Translation of 312 verses by K. P. and V. R. SHASTRI, Tenali 1951. (R)

24. V. V. MIRASHI : The Date of the *Gāthāsaptaśatī*, *Indian Historical Quarterly*, XXIII, 4, pp. 300–10; also *Siddhabhāratī*, pp. 173–83, Hoshiarpur 1950. M. MATHUR assignes the final shape of the *Gāthāsaptaśatī* to the end of the 10th century A. D. See *Nāgarī Pracāriṇī Patrikā*, Vol.56, Nos.3–4, p.274, Varanasi 1951. There was a king Śālivāhana of the Guhilot dynasty of Mevāḍa. He was a Śaiva and given to luxurious living. It is said that six poets helped him to complete the final redaction, and their names are : Vodita (Vodisa),Culluha, Amararāja, Kumārila, Makarandasena and Śrīrāja (See the Intro. of N. CHATURVEDI's ed. noted above).

25. *Gāthā Saptaśatī Sāramu* : Metrical rendering in Telugu by K. PRABHAKAR SHASTRI and K. VIRARAGHAVA SVAMI, Tenali 1951.

26. S. N. BANAHATTI : *Vāṅmaya-Vimarśa* (in Marathi),the first nectar-sweet Love-poem of Mahārāṣṭra (pp. 185 f.), Poona 1955.

27. S. V. SOHONI : Reference to Sātavāhana Coinage in *Gāthāsaptaśatī*, *Journal* of the Bihar R. Society, XL 1, iii, Patna 1955. Shri S. V. SOHONI is continuing his studies on Hāla. He has in press another paper ' The historical corpus of Līlāvaī : Hāla Sātavāhana, Nāgārjuna and Ceylon'. The gist of his analysis is that the observations of Nāgārjuna in persuading Hāla not to give up his life are of real philosophical merit, consistent with Nāgārjuna's recognised position with reference to life's problems. Secondly, that Nāgārjuna did visit Ceylon, in terms of other independent evidence (*Harṣacarita*, supplemented by Chinese and Tibetan sources which are discussed in details). Thirdly, Ceylonese sources give the basis to decide when such a Sātavāhana king could have invaded Ceylon, in the light of the available evidence regarding the chronology of Hāla himself, Nāgārjuna and his disciple Āryadeva. The result goes to confirm that Nāgārjuna belonged to the second century A. D.

28. *Gāthā-ratna-samuccaya* (Abridged) : 133 Prākrit and 133 Sanskrit verses with Sanskrit Commentary by Bhaṭṭa Mathurānātha SHASTRI, with English Preface (dated 17-10-35), 1955. (R)

29. T. RAMACHANDRA : Rural life in *Gāthāsaptaśatī*, Buddha Jayanti Souvenir, Hyderabad 1956. (R)

30. *Gāthā Saptaśatī* : Metrical rendering in Telugu with explanatory notes by G. NARASIMHA SASTRI. There is a neat Introduction in Telugu, Tenali 1956.

31. Ibidem : Text with an elaborate Introduction and Marathi translation by S. A. JOGALEKAR, Poona 1956.

32. Ibidem : Telugu Translation by G. L. N. Shastri, Tenali 1956. (R)

33. Ibidem : ed. R. G. BASAK, Prākrit Text, Sanskrit Chāyā, Select Variants, Annotations and Bengali Translation, Calcutta 1957. (R)

34. Ibidem : (I-II & III.1-15) ed. with Marathi Translation, Notes and critical study, A. MANGRULKAR & D. M. HATA-

VALANE, Poona, 1958. The literary and aesthetic appreciation, pp. 158 ff. deserves special attention.

35. P. SRIRAMAMURTI : Bhāvadīpikā on Saptaśatīsāra of Peda Komati Vema Bhūpāla; Summaries of Papers, All–India O. Conference, XXI Session, Srinagar 1961.

36. *Hindī Gāthā Saptaśati*, : ed. with Chāya and Hindi paraphrase, and with an Intro. containing useful data and information, by NARMADESHVARA CHATURVEDI, Varanasi 1961.

37. J. C. JAIN : *Prākṛta Sāhityakā Itihāsa*, Varanasi 1961.

38. *Ghāthāsaptaśatī* : Telugu Translation of 300 verses by L. N. K. VENKATACHARYA, Hyderabad 1962–63. (R)

39. Ibidem : A Persian Translation; See p. 11 of M. SANGAMESAM's Intro., the *Virivāna*, Ch. L. Nārāyaṇa SASTRI's Telugu Translation of *Bihārī Satsaī*, Madras 1963.(R)

40. *Gāthāsaptaśatī-sāra* : Telugu Translation of 734 verses with Intro., Indices etc. by R. A. K. SHARMA, Hyderabad 1964. (R)

41. S. V. SOHONI : First–Five verses of Gāhāsattasaī, *J.* of the Bihar R. Society, I, i–iv, Patna 1964.

42. *Gāthāsaptaśatī* : (a thesis) in Hindī by PARAMANAND SHASTRI. It has an exhaustive Introduction containing a detailed study of the various aspects of the *Gāthāsaptaśatī* and of the allied topics. The text is accompanied by the Sanskrit chāyā, Hindi paraphrase and exposition. Meerut 1965.

43. *Gāthā Saptaśatī* : Metrical rendering in Kannaḍa by S. V. PARAMESHVARA BHATTA, Sarasa Sāhitya Prakāśana, Mysore 1966.

44. Ibidem : Telugu Translation of some select verses by V. Prabhākara SHASTRI, Bhāratī(July), Madras1966.(R)

45. *Āryāsaptaśatī*, ed. with a commentary by P. V. PANDEYA of Almora, Benaras 1925; Ibid., Hyderabad 1966. (R)

46. M. SANGAMESAM : Culture depicted in the *Gāthāsaptaśatī* (in Telugu) Sāhiti Samiti Vyāsāvali, pp. 119–36, Tirupati 1967. (R)

47. *Āryāsaptaśatī* : (Telugu Translation by Sūryanārāyaṇa SHASTRI, Secundrabad 1938; by N. D. SHARMA, Guntur 1968. (R)

48. Ibidem, with a Commentary in Sanskrit and Hindi and appreciation by Ramākānta TRIPATHI, Varanasi 1968. (R)

49. K. C. SAHA : *Gāthāsaptaśatī*, Summaries of papers, 24th Session, A. I. O. Conference, Varanasi 1968. (R)

50. S. V. SOHONI : Verse No.355 in Gāthāsaptaśatī, *J.* of the Bihar R. Society, LIV, i–iv, Patna, 1968.

51. B. V. SURYANARAYANA : Āndhras and the Gāthāsaptaśatī (in Telugu), Souvenir of the 4th A. I. Tel. Writers' Conference (June), Hyderabad 1968. (R)

52. *Gāhā-sattasaī* (III–IV, V. 1–48), ed. with Marathi Translation by P. B. BADIGER, Sholapur 1969.

53. *Hindī Gathāsaptaśatī* : A research work improved and enlarged with an addition of more than 100 Gāthās and with an appreciation and commentary in Hindi by Jagannātha PATHAK, 1969. (R)

Note :— Entries suffixed with (R) I owe to my friend Prof. E. V. V. Raghavacharya, 636 Vidyanagar, Hyderabad-7 who has on hand an exhaustive Bibliography on the Saptaśatī literature in all the Indian languages, ancient, medieval and modern. He is collecting not only basic works but also essays, articles etc. dealing with them. I am so thankful to him for these entries directly connected with the *Gāthā-Saptaśatī* which he kindly placed at my disposal for being included in my Bibliography.

— श्रीः —

सप्तशतीसारः

वेमभूपालविरचित–भावदीपिकासमेतः ।

[सप्तशतीसारः]

W 1) पसुवइणो रोसारुण-पडिमा-संकंत-गोरिमुहअंदं ।
गहिअग्घ-पंकअं विअ संझा-सलिलंजलिं णमह ॥ १ ॥

W 2) अमिअं पाअड-कव्वं पढिदुं सोदुं व जे ण जाणंति ।
कामस्स तत्त-तत्तिं[1] कुणंति कह ते[2] ण लज्जंति ॥ २ ॥

प्राकृत-सप्तशतीसार-व्याख्या

भावदीपिका

हालः प्राक् सप्तशतीं गाथाकोटेर्व्यधत्त संप्रति तु ।
सोऽयं वेम-नृपालस्तस्या अपि शतकमाहरत्सारम् ॥

१) अथ शालिवाहननरेन्द्रो निर्विघ्नग्रन्थपरिसमाप्त्यर्थमिष्टदेवतानमस्कार-मादौ निबध्नाति । **पसुवइणो**– 'पशुपते रोषारुणप्रतिमासंक्रान्तगौरीमुखचन्द्रम् । गृहीतार्घ्यपङ्कजमिव संध्यासलिलाञ्जलिं नमत ।' **गोरिमुहअंदं** इत्यत्र "गभीरग इत्" इति इत्वम्[3] । पशुपतेः संध्यासलिलाञ्जलिं नमत । कथमिव स्थितम् । रोषारुण-प्रतिमासंक्रान्तगौरीमुखचन्द्रं [4]सद्गृहीतार्घ्यपङ्कजमिव स्थितम् । अत्र गौर्या रोषस्य कारणं[5] संध्यावनितावन्दनम् । यतः स्त्रीणाम् [6]अन्यासंगमवशाद् ईर्ष्यामानो भवति । अर्घ्याञ्जलौ पुष्पं वा फलं वा निक्षेप्तव्यम् इति विधानाद् गृहीतार्घ्यपङ्कजमिवेत्युक्तम् । अत्रोत्प्रेक्षालंकारः । "अन्यथावस्थिता वृत्तिश्चे-तनस्येतरस्य वा । अन्यथोत्प्रेक्ष्यते यत्र तामुत्प्रेक्षां विदुर्बुधाः ॥" ॥ १ ॥ २) इदानीं स कविः प्रशंसापूर्वं काव्यस्योपादेय[ता]माह । **अमिअं**– "अमृतं प्राकृतकाव्यं पठितुं श्रोतुं च ये न जानन्ति । कामस्य तन्त्रतात्पर्यं कुर्वन्ति कथं ते न

---

1 MT तत्ततंकंति । 2 MT दे । 3 T सत्वम् । 4 T संगृही° । 5 T रोषकारणं । 6 T अन्यसं° ।

W 815) गाहाण अ गेआण अ तंती-सद्दाण पोढ[1]-महिलाणं ।
ताणं स च्चिअ दंडो जे ताण रसं ण जाणंति ॥ ३ ॥

W 893) पणमह माणस्स हला चलणे किं देवएहि अण्णेहिं ।
जस्स पसादेण पिओ घोलइ पाअंत-पासेसु ॥ ४ ॥

लज्जन्ते ॥" **पाअडकव्वं** इत्यत्र " प्रतिगेऽप्रतीपगे " इति डत्वम् । तत्ती-शब्द-स्तात्पर्यवाची । वरइत्तादिषु पाठात् सिद्धः । अत्र प्राकृतकाव्यस्यामृतवदाह्लाद-कत्वादमृतत्वारोपः । सर्वत्र कामसिद्धान्तस्य निरूपणार्थादेतत् पठितुमन्येन पठ्यमाने श्रोतुं वा ये न प्रथन्ते तेषां कामतन्त्रतात्पर्यकरणं लज्जावहं कथं न भवतीत्यभिप्रायः । तस्मादवश्यं ज्ञातव्यमित्यस्योपादेयता । अमृतत्वरूपणात् प्रशंसाहेतुरलंकारः । श्रवणपठनाभावस्य लज्जावहत्वात् ॥ २ ॥ ३) अपि च । **गाहाण–** ' गाथानां गेयानां तन्त्रीशब्दानां प्रौढमहिलानाम् । तेषां स एव दण्डो ये तेषां रसं न जानन्ति ॥ ' अत्र **ताण** एतच्छब्दः प्रसिद्धो गाथाभिः प्रत्येकं संबध्यते । अत्र गाथानामुपादेयगेयादिसाहचर्यादुपादेयता । अवश्यं ज्ञातव्यानां रसावहानां गायनादीनामज्ञानात् तथाविधसुखेनात्मानं वञ्चयतामात्मद्रोहिणां दण्डः क इत्यपेक्षायां स एव दण्डः, तज्ज्ञानाभाव[2] एव दण्ड इत्युक्तम् । तस्माद्विशिष्टो दण्डो नास्तीति भावः । अतिशयोक्तिरलंकारः । " विवक्षा या विशेषस्य लोकसी-मातिवर्तिनी । असावतिशयोक्तिः स्यादलंकारः सतां मता ॥ " इत्युक्तत्वात् । गाथारसज्ञेन[3] दण्डकथनेन एतदुत्कर्षो द्योत्यते[4] । यद्वा तुल्ययोगितालंकारः । " विवक्षितगुणोत्कर्षैर्यः समीकृत्य कस्यचित् । कीर्तनं स्तुतिनिन्दार्थं सा मता तुल्ययोगिता ॥ " इत्युक्तत्वात् ॥३॥ ४) प्रियं वशीकर्तुमुद्यताः सखीः सख्याह **पणमह–** 'प्रणमत मानस्य हे सख्यश्चरणौ किं दैवतैरन्यैः[5] । यस्य प्रसादेन प्रियो घूर्णति पादान्तपार्श्वेषु ॥' **घोल** इत्यत्र " घूर्णेर्घुम्मपहल्लघोलघुलाः " इति घोलादेशः । प्रियं वशीकर्तुमू अन्या देवता न सेव्या । अस्य फलस्य दुर्लभत्वात् । किंतु मान एकः सेव्यः । तस्मिन् सेविते सति तत्प्रसादेन प्रियः

---

1 M कोत्थ, वोंथ [त्थ] for पोढ T । 2 M तदज्ञाना° । 3 M गाथारसज्ञानां । 4 T द्योतते ।
5 T °रन्योन्यैः ।

W 522) **सच्चं कलहे कलहे सुरआरंभो णवो णवो होइ ।**
माणो[1] उण माणंसिणि गरुओ पेम्मं विणासेइ ॥ ५ ॥

W 12) **सच्चं जाणइ दट्ठुं सरिसम्मि जणम्मि जुज्जए राओ ।**
मरउ ण तुमं भणिस्सं मरणं पि[2] सिलाहणिज्जं से ॥ ६ ॥

पादयोर्लुठन् वश्यो भवति । तस्मान्मान[3] एव सेव्य इत्याशयः । अत्र हेतुरलंकारः । मानप्रणामस्य प्रियावर्जनहेतुत्वात् । लक्षणामूलपदगतात्यन्ततिरस्कृतोऽविवक्षितवाच्यो ध्वनिः । घोल इत्यनेन प्रणामे लक्षिते प्रियवशंवदत्वरूपस्य फलस्य गम्यमानत्वात् । ध्वनिर्नाम[4] वाच्यादतिशयितं काव्यम् । तथा चोक्तम् । " इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद् ध्वनिः " इत्यादि ॥४॥ ५) काचिदुपायेन मानात् सखीं निवारयति । **सच्चं कलहे–** ' सत्यं कलहे कलहे सुरतारम्भो नवो नवो भवति । मानः पुनर्मनस्विनि गुरुः प्रेम विनाशयति ॥' **माणंसिणि** इत्यत्र "तु समृद्ध्यादौ" इति बिन्दुल् । अत्र मानः कर्तव्य इत्यनुनीय विफलासु सखीषु काचिद्विदग्धा सखी नायकेन भेदं गमिता नायिकामुपेत्य, मनस्विनि मानो न कर्तव्य इति वृथा त्वामाक्षिपन्ति मुग्धाः सख्य एताः । मानः कर्तव्यः । माने हि फलं महदस्तीति नवनवसुरतारम्भरूपं फलं दर्शयित्वा तदात्वीभूय स पुनर्मानो गुरुश्चेत् प्रेम विनाशयति । अतो दीर्घो न कार्य इत्युपदिश्य तां मानान्निवारयतीति भावः । अत्र स्वतःसिद्धार्थशक्तिमूलोऽलंकारेणालंकारध्वनिः, हेतुना गुरुर्न कर्तव्य इत्याक्षेपस्य-गम्यमानत्वात् । यथोक्तम्–"प्रतिषेधोक्तिराक्षेपः ।" ॥ ५ ॥ ६) दूतीवाक्यम् । **सच्चं जाणइ –** ' सत्यं जानाति द्रष्टुं सदृशे जने युज्यते रागः । म्रियतां न त्वां भणिष्यामि मरणमपि श्लाघनीयमस्याः ॥ ' अत्र द्रष्टुं जानाति सत्यमित्यनेन कुलशीलसौन्दर्यादिभिर्गुणैर्लोकोत्तरे नायके अभिलाषां कृतवतीति[5] गम्यते । सदृशे जने युज्यते राग इत्यनेन लोकोत्तरस्य नायकस्य नायिकया सादृश्यकथनात् नायिकाया अपि लोकोत्तरत्वं गम्यते । [6]म्रियतामित्यनेन नायिका नवमीं दशां प्राप्तेति गम्यते । त्वां न हि भणिष्यामीत्यनेन भवान् सर्वोपालम्भानां भाजनमिति गम्यते । अस्याः मरणमपि श्लाघ्यमित्यनेन एतादृशि पुरुषेऽनुरागं कृत्वा मृता-

---

1 M T माण । 2 M T वि । 3 M T तस्यात्मन । 4 T ध्वनिर्नर्म । 5 T गतवतीति ।
6 M T मृगयामि° ।

W 886) कस्स व ण होइ रोसो दट्ठूण पिआए सव्वणं अहरं ।
स-भमर-पोम्मग्घाइणि वारिअ-वामे सहसु एण्हिं ॥ ७ ॥

W 861) जं तुह कज्जं तं चिअ कज्जं मज्झ त्ति जं सदा भणसि ।
ओ दूइ सच्च-वअणे अज्ज खु पारं गआ तस्स ॥ ८ ॥

यामपि तस्यां कीर्तिरेव नोपालम्भ इति गम्यते । अथवानिष्टमपि मरणमिदानीं संतापहारितया[1] तस्याः श्लाघ्यमिति गम्यते । अत्र काचिद्विदग्धा दूती नायकं गत्वा नायिकामाह । अर्ह एव नायकेऽभिलाषं चक्रे सदृशे । कुतः सोयमनुरागो युज्यते जनैरनुमोद्यत एवेति प्रशंसायाम् । विरहव्यथातिशयेन म्रियताम् । यतोऽस्या मरणमपि श्लाघ्यम् । ततो न त्वां भणिष्यामीति वक्रोक्त्या भवान् उपालम्भभाजनं भविष्यतीत्युपालम्भप्रदर्शनेन नायकं प्रोत्साहयतीत्यभिप्रायः । अत्र दूती निसृष्टार्था । तथा चोक्तम् "बुध्द्वैतस्य समीहितमात्मधियैवारभेत या कार्यम् । सा हि निसृष्टार्थेति ।" अत्र लक्षणामूलवाक्यगतात्यन्ततिरस्कृताविवक्षितवाच्यसंकीर्णो ध्वनिः । सत्यं जानाति द्रष्टुमित्यादिभिर्गम्यमानैरनुग्राहकैर्न त्वां भणिष्यामीत्यनेन गम्यमानस्यानुग्राह्यत्वात् ॥ ६ ॥ ७) कस्याश्चित् सख्या वचनम् । **कस्स**– 'कस्य वा न भवति रोषो दृष्ट्वा प्रियायाः सव्रणमधरम् । सभ्रमरपद्माघ्रायिणि वारितवामे सहस्वेदानीम् ॥' **पोम्मं** इत्यत्र " पद्मे मि " इत्यत्रोक्तम् । (त्वं) **एण्हि** इत्यत्र " एण्हि एत्तहे इदानीमः " इति इदानीं–शब्दस्य **एण्हि** आदेशः । अत्र काचिद्विदग्धा सख्युपपतिना दष्टाधरां सखीं पतिरालोक्य किं वा प्रतिवक्तीति तस्मिन् समागच्छति सति तदागमनमजानतीव तां प्रति, हे वारितवामास्ये मद्वचनानङ्गीकारिणि प्रियायाः सव्रणमधरं दृष्ट्वा कस्य रोषो न भवति, ईर्ष्याभररहितस्यापि रोषो भवतीत्यर्थः। सभ्रमरपद्माघ्राणं न कर्तव्यमित्युक्तम् । किमर्थं कृतम् । इदानीं न केवलं वेदनामेव, तद्दृष्ट्वा तेन यत्क्रियते तदपि सहस्वेति सखीं भर्त्सयन्तीव तस्या अधरक्षतिर्भ्रमरकृता अकृतेति तं प्रति [2]श्रावयतीत्यभिप्रायः । अत्र स्वतःसिद्धार्थशक्तिमूलो वस्तुनान्यविषयो वस्तुध्वनिः ॥ ७ ॥ ८) नायिका दूतीमुपालभते । **जं तुह**–

---

1 T संतापकारि° । 2 M T श्रावयन्त्य° ।

W 137) फुरिअं वामच्छि तुए जइ एहिइ मम[1] पिओ ज्ज ता सुइरं ।
संमीलिअ दाहिणअं तुए विअण्हं[2] पुलोइस्सं ॥ ९ ॥

W 23) आणा-सआइ देंती[3] तह सुरए हरिस-विअसिअ-कवोला ।
गोसे वि ओणअ-मुही अह से त्ति पिअं ण सद्दहिमो ॥१० ॥

' यत्तत्र कार्यं तदेव कार्यं ममेति यत्सदा भणसि । ओ दूति सत्यवचने अद्य खलु पारं गता तस्य '। "ओ (इति) पश्चातापसूचने"। अत्र नायिका दूतीं प्रति, यत्कृत्यं (तत्र) तदेव मत्कार्यमिति यत्सदा भणसि । हे सत्यवचने अद्य तस्य कार्यस्य पारं गतासीत्यनेनासत्यप्रलापिनि मे प्रियसंगमरूपं यत्कार्यं त्वया च प्रेरितं मया ज्ञातमिति तामुपालभत इत्यभिप्रायः । अत्र लक्षणामूलवाक्यगतात्यन्त तिरस्कृताविवक्षितवाच्यसंकीर्णो ध्वनिः, सत्यपदवचनव्यङ्ग्यस्यानुग्राह्यत्वात्[4] ॥८॥

९) नायिकोक्तिः। **फुरिअं–** ' स्फुरितं वामाक्षि त्वया यद्येष्यति मे प्रियोऽद्य तस्मात् सुचिरम्। संमील्य दक्षिणं त्वया वितृष्णं द्रक्ष्यामि॥' **दाहिणअं** इत्यत्र "हे दक्षिणे(स्य)"इति दीर्घः। "न वा तीर्थदुःखदक्षिणदीर्घे" इति हादेशः। अत्र काचित् प्रियदर्शनोत्सुका प्रोषितभर्तृका स्फुरणैरक्षिण प्रियागमनं शंसति सति हृष्टा, हे वामाक्षि वामनेत्र, अद्य मे प्रियो यद्येष्यति[5] तदा दक्षिणं संमील्य त्वयैवावितृष्ण--मवलोकयिष्यामीति पारितोषिकं प्रतिशृणोतीत्यभिप्रायः । ज्ञापकहेतुरलंकारः, अक्षिस्फुरणस्य प्रियदर्शनज्ञापकत्वात्। अत्र वाक्यगतो विवक्षितान्यपरवाच्यो ऽसंलक्ष्यक्रमो भावध्वनिः, तस्य गम्यमानत्वात्॥ ९॥

१०) नायिकोक्तिः। **आणासआइ–** ' आज्ञाशतानि ददती तथा सुरते हर्षविकसितकपोला। गोसर्गे व्यपनतमुखी असौ सेति प्रियां न श्रद्दध्मः ॥' गोसर्ग(इति)प्रभातवाची, गोणादिषु पाठात् सिद्धः। आज्ञाशतानि–मुञ्च,पीडय,गृहाण,जीवय,त्रायस्वेत्यादि। **अह** एतददसः प्रथमैकवचनम्, "अहद्वा सुना" इति सूत्रात् सिद्धम्। अत्र नायको निशायां सुरते हर्षविकसितकपोलां रसावेशादाज्ञाशतानि ददतीमतिधृष्टां स्वकीयां नायिकामुपलभ्य प्रभाते किमप्यजानतीमिव लज्जयावनतमुखीं सेयमित्यश्रद्धेयां च दृष्ट्वा स्त्रीणां[6] श्लाघ्यं सुरते धार्ष्ट्यम्। अन्यदा लज्जेति गुणद्वयमस्यामेव प्रतिष्ठितमिति तां प्रशंसतीति भावः। अत्र संलक्ष्यक्रमविवक्षितान्यपरवाच्यसंसृष्टो भावध्वनिः, धार्ष्ट्यव्रीडयोः

---

1 MT मरू। 2 MT वितिण्हं। 3 MT दंती। 4 T °नुग्राहकत्वात्। 5 T यदेष्यति।
6 T सखीनां।

W 655) पच्चूसागअ णव-राअ-रत्त किअ-लोअ-लोअणाणंद ।
अण्णत्थ[1]-गमिअ-सव्वरि[2] णह-भूसण देव दिणवइ णमो दे ॥११॥

W 416) वाहित्ता पडिवअणं ण देइ रूसेइ एक्कमेक्कस्स ।
असई कज्जेण विणा पलिप्पमाणे णई-कच्छे ॥ १२ ॥

प्रतीयमानत्वात् ॥ १० ॥ **११)** काचित् प्रियमन्यापदेशेनोपालभते। **पच्चूसागअ–** ' प्रत्यूषागत नवरागरक्त कृतलोकलोचनानन्द । अन्यत्र गमितशार्वरीक नभोभूषण (नखभूषणेति च) दिनपते नमस्ते ॥ ' अत्र वाच्यार्थः स्पष्टः । व्यङ्ग्यार्थस्तु प्रत्यूषागत, नवरागरक्त, प्रियालिङ्गनवशात् कुचतटसक्तकुङ्कुमादिरागरक्त, कृतलोकलोचनानन्द, अभिलषितकामिनीसंगमवशादतिप्रसन्नमुखरागतया जनितजननयनोत्सव, अन्यत्र गमितशार्वरीकेति शर्वरीविरहो लक्ष्यते । नखपदभूषण, दिनपते, न रात्रौ, नमस्त इतीतःपरं त्वया संभाषणं न करिष्यामीति । अत्र काचित् खण्डिता सूर्यप्रणाममाचरन्ती तत्समये पश्चादागतं कृतागसं कृतापराधं नायकमजानतीव सूर्यस्तुतिं व्याजीकृत्य प्रत्यूषागतेति पदबन्धेन तत्कृतापराधान् गणयन्ती नमस्त इति वक्रोक्त्या तमुपालभत इति भावः । लक्षणामूलोऽत्यन्ततिरस्कृताविवक्षितवाच्यसंकीर्णो ध्वनिः । उभयशक्तिमूलोपमालंकारेण नमस्त इत्यनेन गम्यमानस्यानुग्राह्यत्वात् ॥ ११ ॥ **१२)** कस्याश्चिद् वचनम् । **वाहित्ता–** ' व्याहृतापि प्रतिवचनं न ददाति रुष्यत्येकैकस्मै । असती कार्येण विना प्रदीप्यमाने नदीकच्छे ॥' **वाहित्ता** इत्यत्र दैवादिपाठाद् द्वित्वम् । अत्र नदीकच्छे दावानलेन दह्यमाने सति असत्यन्येन व्याहृता प्रतिवचनं न ददाति । कार्येण विना एकैकस्मै रुष्यतीत्यनेनैष मम चिरात् संकेतभूतो नदीकच्छः परिदह्यत इति वैमनस्यचिन्ताविषादादिभावाकुलत्वं विचेष्टते पश्येति काचित् सहचरीमाहेति भावः । अत्रासुन्दरं नाम गुणीभूतव्यङ्ग्यं नदीकच्छदाहेन गम्यमानत्वात् । संकेतस्थानभ्रंशात् [व्याहृतापि] प्रतिवचनं न ददातीत्येकैकस्मै रुष्यतीति वाच्यार्थस्यैव चमत्कार्यत्वात् । यथा काव्यप्रकाशे–" अगूढमपरस्याङ्गं वाच्यसिद्ध्यङ्गमस्फुटम् । संदिग्धतुल्यप्राधान्ये काक्वाक्षिप्तमसुन्दरम् । व्यङ्ग्यमेवं गुणीभूतव्यङ्ग्यस्याष्टौ भिदाः स्मृताः "॥ १२ ॥ **१३)** कस्याश्चिद् वचनम् ।

---

1 MT अणत्त । 2 MT सव्वरिअ ।

W 161) उद्धच्छो पिअइ[1] जलं जह-जह विरलंगुली चिरं पहिओ ।
पावालिआ वि तह-तह धारं तणुअं पि तणुएइ ॥ १३ ॥

W 821) अव्वो ण-आमि खेत्तं खज्जउ साली वि कीर-णिवहेहि ।
जाणंता[2] अवि पहिआ पुच्छंति पुणो पुणो मग्गं ॥ १४ ॥

W 669) अत्ता एत्थ णुम इ एत्थ अहं एत्थ परिअणो[3] सअलो ।
पंथअ राई-अंधल मा मे[4] सअणे णुमज्जहिसि[5] ॥ १५ ॥

उद्धच्छो– 'ऊर्ध्वाक्षः पिबति जलं यथा यथा विरलाङ्गुलिश्चिरं पथिकः । प्रपापालिकापि तथा तथा धारां तनुं वितनुते हि ॥' अत्र **पावालिआ** इत्यत्र 'वैद्वचः' [?] इति निषेधेऽपि बहुलग्रहणम् । अत्र पथिकः प्रपापालिकामुखसौन्दर्यदिदृक्षयोन्नमितनयनो विरलाङ्गुलिर्यथा यथा जलं पिबति प्रपापालिकापि तथैव तन्मुखदिदृक्षया धारां तनुं वितनुत इति । अनेनोभौ च परस्परानुरक्तौ परस्परालोकनसुखमनुभवितुं विरलाङ्गुलित्वरूपं धारातनुत्वरूपं च कैतवमाचरत इति पश्येति काचित् सहचरमाहेति भावः । अत्रासंलक्ष्यक्रमो विवक्षितान्यपरवाच्यसंकीर्णो भावध्वनिः । परस्परानुरागप्रतीतेः ॥ १३ ॥ **१४)** बालिकावचनम् । **अव्वो–** 'अव्वो (इति खेदे ।) न यामि क्षेत्रं, खाद्यतां शालिरपि कीरनिवहैः । जानन्तोऽपि पथिकाः पृच्छन्ति पुनःपुनर्मार्गम् ॥' खाद्यतां भक्ष्यताम् । अत्र काचित् बालिका मात्रा शालिगोपनाय क्षेत्रं व्रजेति नियुक्ता नाहं क्षेत्रं व्रजामि, शालिः कीरनिवहैरपि खाद्यतां नाम । यतस्तत्र मार्गं जानन्तोऽपि पथिका मार्गप्रश्नेन खेदयन्तीत्यमुग्धोक्त्या स्वकीयलावण्यातिशयमोहितानां दर्शनालापकुतूहलिनां तेषामभिप्रायमजानती स्वमौढ्यं प्रकटितवतीति भावः । अत्राक्षेपोऽलंकारः, हेतुर्वा । अत्र स्वतःसिद्धार्थशक्तिमूलः संकीर्णो वस्तुना वस्तुध्वनिः, तत्सौन्दर्यातिशयमाग्ध्यतद्वचनश्रवणाभिलाषाणां प्रतीयमानत्वात् ॥ १४ ॥ १५) असत्या वचनम् । **अत्ता–**'श्वश्रूरत्र निषीदति अत्राहमत्र परिजनः सकलः । पान्थ रात्र्यन्ध मामकशयने निषेत्स्यसीति ' ॥ **एत्थ** इत्यत्र "शय्यादौ" इत्येत्वम् । **णुमज्जइ** इत्यत्र " नेः सदेर्मज्जः " इति निपूर्वस्य सीदतेर्मज्ज आदेशः । निरीक्ष्य प्रवादिष्विति नेतृत्वम् । **अंधल** इत्यत्र " लो वा विद्युत्प-

---

1 M T पियइ । 2 M T जाणंतं । 3 MT परिएणो । 4 MT मा मस । 5 MT णुमज्जसिहि ।

W 127) अहअं लज्जालुइणी तस्स अ उम्मत्तआइ पेम्माइं ।
सहिआ-जणो वि णिउणो हलाओ किं पाअ-राएण ॥ १६ ॥

W 714) जं असरणो व्व दड्ढो गामो साहीण-बहु-जुवाणो ।
संभम-विसंठुलाणं तं दुच्चरिअं तुह थणाणं ॥ १७ ॥

त्रपीतान्धात् " इत्यादौ स्वार्थे लत्वम् । अत्र काचिच्चलितचारित्रमुद्रा प्रोषितपतिका युवतिर्वासरावसाने वसतिं प्रार्थयमानं कंचित् पथिकं युवानमुद्दिश्य समुत्पन्नमन्मथावेशा श्वश्रसंनिधौ तस्मै शयनस्थानं विविक्तमुद्दिश्य तस्मिन्निशान्धतामारोप्य श्वश्रत्र निषीदतीत्यादिना श्वश्र्वादिसंनिवेशस्थानं दर्शयन्ती स्वशयनस्थानं स्पर्शप्रतिषेधव्याजेन रात्रावत्र मदीयमेव शयनस्थानं त्वया निभृतमुपस्थातव्यम् इति स्वयं दूतीवृत्त्या स्वाभिप्रायमस्मै निवेदयतीति भावः । अत्र स्वतःसिद्धार्थशक्तिमूलो निषेधरूपेण वस्तुना विधिरूपो वस्तुध्वनिः, मच्छयनं निभृतमुपस्थातव्यमिति विधिप्रतीतेः ॥ १५ ॥ १६) नायिकावचनम् । **अहअं**– ' अहं लज्जावती तस्य चोन्मस्तकानि प्रेमाणि । सखीजनोऽपि निपुणो हे सख्यः किं पादरागेण ॥ ' **लज्जालुइणी** इत्यत्र " वरइत्तगास्तृनाद्यैः " इति तद्गुणे निपातितः । अत्र स्वाधीनभर्तृका प्रगल्भा नायिका प्रसाधिकासु लाक्षारागेण पादमलंकर्तुमुद्यतासु, मम पादरागो न कार्यः । यस्मात् प्रियः प्रेमावेशवशंगतो रसातिरेकान्मामवश्यं पुरुषायितं कारयिष्यति । तदानीं निपुणः सखीजनो शय्यागतैः सालक्तकपदाङ्कैस्तदनुमान्य लज्जाकुलां मामपहसिष्यन्तीति पादरागनिषेधेन प्रियो मय्यत्यन्तमनुरक्त इति स्वसौभाग्यं प्रकटितवतीति भावः। अत्र स्वतःसिद्धार्थशक्तिमूलो निषेधरूपेण वस्तुनासंकीर्णो वस्तुध्वनिः, लज्जावतीत्यादिपदप्रकाश्यैर्वाच्यसिद्ध्यङ्गगुणीभूतव्यङ्ग्यैः पादरागनिषेधप्रतीयमानस्य तत्सौभाग्यप्रकटनस्यानुग्राहकत्वात् ॥१६॥१७) दूत्या वचनम् । **जं असरणो**–'यदशरण इव दग्धो ग्रामःस्वाधीनबहुयुवापि। संभ्रमविसंष्ठुलयोस्तद् दुश्चरितं तव स्तनयोः ॥' अत्र केनचित् प्रेषिता विदग्धदूती नायिकामुपेत्य तत्स्तनमण्डलं ग्रामदहनसमये संभ्रमचलितमतिमनोहरं दृष्ट्वा सर्वयुवसु चित्रितेष्विव निश्चेष्टितेषु ग्रामोऽयमशरण इव दग्ध इति तस्याः स्तनसौन्दर्यवर्णनया तां वशीकर्तुमुत्कर्षयतीति भावः । हेतुरलंकारः । कविनिबद्धवक्तृप्रौढोक्तिसिद्धालंकारव्यङ्ग्येन वस्तुनः वस्तुध्वनिः । अत्र हेतुना यूनां निश्चेष्टा गम्यते । तेन स्तनसौन्दर्यातिशयः ॥१७॥

W 48) अण्ण-महिला-पसंगं दे देव्व करेहि मज्झ दइअस्स ।
पुरिसा एक्कंत-रसा ण हु दोस-गुणे विआणंति ॥१८॥

W 874) वाणीर-कुडंगुड्डीण-सउणि-कोलाहलं सुणंतीए ।
घर-कम्म-वावुडाए वहूएँ सीअंति[1] अंगाइं ॥ १९ ॥

W 52) सिहि-पिच्छ-लुलिअ-केसे वेवंतोरु विणिमीलिअद्धच्छि ।
दर-पुरिसाइअ-विसमिरि ण-अणसि[2] पुरिसाण
जं दुक्खं ॥ २० ॥

---

१८) कस्याश्चिद् गर्वोक्तिः । **अण्णमहिला–** 'अन्यमहिलाप्रसंगं दे दैव कुरु मम दयितस्य । पुरुषा एकान्तरसा न खलु दोषगुणान् विजानन्ति ॥' "दे (इति) संमुखीकरणे" । अत्र काचित् प्रगल्भा नायिका यत्र क्वापि कृताभिलाषं पतिं सखीमुखादाकर्ण्य । तासां पुरस्ताद् हे दैव, मे प्रियस्या-न्यमहिलाप्रसंगमवश्यं कुरु । यस्मादेकत्रैव रस आसक्तिर्येषां ते तथा गाढासक्ताः पुरुषा दोषगुणान्न विजानन्ति । तस्मिन् कृते सत्यन्यत्र दोषान् ज्ञात्वा तादृशो गुणः क्वापि नास्तीति मय्येवातितरामासक्तो भविष्यतीति स्वकीयां संवननचातुरीं जानतीमीर्ष्यायां कर्तव्यायामपि [3]प्रत्युतास्यान्यासंगं प्रार्थयमाना स्वसौभाग्यगर्वं प्रकटितवतीत्यभिप्रायः । अतिशयोक्तिरलंकारः । तदुत्कर्षस्य गम्यमानत्वादत्र वाक्यगतासंलक्ष्यक्रमो भावध्वनिः, गर्वस्य प्रतीयमानत्वात् ॥ १८ ॥ १९) कस्या-श्चिद्वचनम् । **वाणीर–**' वानीरकुडङ्गोड्डीनशकुनिकोलाहलं शृण्वत्याः । गृहकर्म-व्यापृताया वध्वाः सीदन्त्यङ्गानि ॥' **वावुडाए**–इत्यत्र "प्रतिगेऽप्रतीपगे" इति डत्वम् । अत्रैकस्या वानीरकुञ्जे दत्तसंकेतायास्तदुड्डतशकुनिकोलाहलश्रवणेन तत्रागतमुपपतिं ज्ञातवत्याः श्वश्र्वादिनियोगेन गृहकर्मव्यापृतत्वाद् विहाय गन्तुमशक्तायाः स्नुषाया उत्कण्ठातिशयेनाङ्गानि ताम्यन्ति, पश्येति काचिदसती सहचरीमाहेत्यभिप्रायः । हेतुरलंकारः। अत्रासुन्दरं नाम गुणीभूतव्यङ्ग्यम्। कश्चिल्लतागृहं प्रविष्ट इति व्यङ्ग्यात् सीदन्त्यङ्गानीति वाच्यस्यैव चमत्कारकारित्वात् ॥ १९ ॥ २०) नायको नायिकामाह । **सिहिपिच्छ–**'शिखिपिच्छलुलितकेशे वेपमानोरु विनिमीलितार्धाक्षि । [4]ईषत्पुरुषायित-

---

1 M T सीयंति । 2 M T ण आणासि । 3 M T प्रत्युत्तरस्य अन्यासंगं । 4 T दरपु° ।

W 190) अज्ज च्चेअ पउत्थो[1] अज्ज च्चिअ सुण्णआइ जाआइं ।
रच्छामुह-देउल[2]-चच्चराइ[3] अम्हाण अ घराइं ॥ २१ ॥

W 49) थोअं पि ण णीइ[4] इमा मज्झण्हे[5] उअ[6] सिसिरअल-लग्गा ।
आअव-भएण छाहा वि ता पहिअ किं ण वीसमसि[7] ॥ २२ ॥

विश्रमशीले[8] न जानासि पुरुषाणां यद्दुःखम् ॥' अत्र[9] नायको नायिकां प्रति, त्वं पुरुषायितेन शिखिपिच्छलुलितकेशे, वेपमानोरु, अर्धनिमीलिताक्षी सती क्षणेन श्रान्तासि। पुरुषाणामस्माकं[यद्दुःखं]तन्न जानासीति स्वदुःखनिवेदनव्याजेन तत्पुरुषायितकौतुकम्। इतःपरमपि त्वया पुरुषायितमङ्गीकर्तव्यमिति तां प्रोत्साहयतीत्यभिप्रायः । रसवदलंकारः । गुणीभूतो रसादिर्यत्र तत्र रसवदलंकार इत्युक्तत्वात् । अत्र गुणीभूतव्यङ्ग्येन रसवदर्थशक्तिमूलो वस्तुना वस्तुध्वनिः, संभोगस्य वाच्य–सिध्द्यङ्गत्वात् ॥ २० ॥ २१) कस्याश्चिद् वचनम् । **अज्ज च्चेअ**– 'अद्यैव प्रोषितः अद्यैव शून्यानि जातानि । रथ्यामुखदेवकुलचत्वराण्यस्माकं च गृहाणि॥' अत्र काचिदसच्चरिता पत्यौ प्रोषिते सति सखीसमक्षं पतिरद्यैव प्रोषितः । अद्यैव रथ्यामुखादीनीत्यनेन सर्वालंकारभूतेन तेन विना अरमणीयानि जातानीति पति–सौभाग्यवर्णनव्याजेन पतिप्रवासादस्माकं गृहं शून्यं रथ्यामुखादीनि दैववशाज्जन–रहितानि । अतस्तव यत्र वा रन्तुमिच्छा तत्रागन्तव्यमिति [10]वातदूतीवृत्त्या प्राति–वेशिकं श्रावयतीत्यभिप्रायः । "यान्यसंभाषणव्याजात् स्वाभिप्रेतार्थमुत्सुका । या श्रावयत्यसांमुख्याद्वातदूतीति सा मता ॥"हेतुरलंकारः, तत्प्रवासस्य शून्यताहेतुत्वात् । अतः स्वतःसिद्धार्थशक्तिमूलो वस्तुनान्यविषयो वस्तुध्वनिः, अनेन त्वया समागन्तव्यमित्यस्य प्रतीतेः ॥ २१ ॥ २२) काचित् प्रपापालिका पथिकयुवानमाह । **थोअं पि ण**—'स्तोकमपि न गच्छति यन्मध्याह्ने पश्य शिशिरतललग्ना । आतपभयेन च्छायापि तस्मात् पथिक किं न विश्राम्यसि ॥' "गमिरणुवज्जा" इत्या–दिना गमेः **णिइ** इत्यादेशः । **छाहा** इत्यत्र "छायायां होऽकान्तौ" इति हादेशः । अत्र काचित् प्रपापालिका ग्रीष्ममध्याह्नसमये यत्र कुत्रापि गच्छन्तं

---

1 MT पउट्ठो । 2 MT देवउल । 3 M चत्तराइ । 4 [णिइइ] । 5 MT मज्झण्णे ।
6 MT पस्स । 7 की ण विस्समसि । 8 M विश्रमन्ती । 9 T adds कश्चित् after अत्र ।
10 T वा तद्दूति° ।

W 21) असमत्त-मंडण-च्चिअ[1] गच्छ घरं से स-कोउहल्लस्स ।
वोलाविअ-हलहलिअस्स पुत्ति चित्ते ण लग्गिहिसि[2] ॥ २३ ॥

W 418) णिद्दं लहंति भणिअं सुणंति खलिअक्खरं ण जंपंति ।
जाहि ण दिट्ठो सि तुमं ताओ च्चिअ सुहअ सुहिआओ ॥२४॥

पथिकयुवानं प्रति, अस्मिन् समये तीव्रातपभयात् छायापि शिशिरतलं विनापि स्तोकमपि न निर्याति । किं पुनरन्यो भवान् किमर्थं न विश्राम्यतीति स्वयं दूतीवृत्त्येदानीमत्र न कोऽपि संचरति, विविक्तोऽयं प्रदेशः, क्षणमात्रं विश्राम्यतामिति स्वाभिलषितं प्रकटितवतीति भावः । अत्र वाक्यग[3]तासं–लक्ष्यक्रमो भावध्वनिः, अनुरागस्य प्रतीयमानत्वात् ॥ २२ ॥ **२३**) काचिद्विदग्धा बालिकामुपदिशति । **असमत्त–** ' असमाप्तमण्डनेनैव गच्छ गृहमस्य सकौतूहलस्य । अपक्रमितानुरागस्य पुत्रि चित्ते न लगिष्यसि ॥ ' **हलहली–**शब्दो ऽनुरागवाची देश्यः । " वरइत्त " आदिपाठात् सिद्धः । अत्र काचिद्विदग्धात्युत्कण्ठातुरेण प्रियेण मुहुर्मुहुराहूयमानायां प्रियवशीकरणायात्मानं मण्डयन्तीं बालां, हे पुत्रि, असमाप्तमण्डनैव[4] गच्छ । मण्डनविलम्बनेनालम् । इदानीमेव गच्छ । नो चेन्मुहुर्मुहुर्मय्याह्वयति निरादरा नागतेति तस्मिन् रोषेणापक्रान्तोत्कण्ठे सति पश्चात् त्वं गत्वापि तस्य न लगिष्यसीत्यनेन प्रियवशीकरणे मण्डनमप्रयोजकम् । उत्कण्ठासमकालमेव गत्वा तदनुवर्तनमेव प्रयोजकमिति तामुपदिशतीत्यभिप्रायः । अतः स्वतःसिद्धार्थ–शक्तिमूलो वस्तुनालंकारध्वनिः, प्रियावर्जने तदनुवर्तनस्य हेतुत्वात् ॥ २३ ॥ **२४**) काचित् प्रियामुपालभते । **णिद्दं–** ' निद्रां लभन्ते भणितं शृण्वन्ति स्खलिताक्षरं न जल्पन्ति । याभिर्न दृष्टो ऽसि त्वं ता एव सुभग सुखिताः ॥ ' अत्र काचित् कस्मिंश्चिदभिरूपे यूनि कृतानुरागा तं प्रति, हे सुभग, याभिर्न दृष्टो ऽसि ता एव सुखिताः । यतो निद्रां लभन्ते, स्खलिताक्षरं न जल्पन्ति, सख्यादिभणितं [शृण्वन्तीत्यनेन त्वद्दर्शनात्प्रभृति विरहव्यथातिशयान्निद्रा न लभ्यते, त्वदाहृतचित्ततया सख्यादिभणितं] न श्रूयते, त्वद्ध्यानवासनाजनितश्रमतया स्खलिताक्षरं प्रजल्प्यत इत्यात्मनो दशाविशेषान् सूचयन्ती मामेवंविधावस्थां किमुपेक्षस इत्युपालभत इत्यभिप्रायः । हेतुरलंकारः, दर्शनाभावस्य निद्रादिहेतुत्वात् । अत्र स्वतःसिद्धार्थशक्तिमूलो वस्तुना संकीर्णो वस्तुध्वनिः, निद्रां लभन्त

---

1 M T मंसणं चिअ । 2 M T लग्गिसिहि । 3 T गतसं° । 4 T मण्डनेनैव ।

W 73) जं जं सो णिज्झाअइ अंगोआसं महं अणिमिसच्छो ।
पच्छाएमि अ तं तं इच्छामि अ तेण दीसंतं ।। २५ ।।

W 42) आरंभंतस्स धुअं लच्छी मरणं व होइ पुरिसस्स ।
तं मरणमणारंभे वि होइ लच्छी उण ण होइ ।। २६ ।।

W 168) अच्छउ ताव मणहरं पिआएॅ[1] मुह-दंसणं [अइमहग्घं] ।
तग्गाम-छेत्त-सीमा वि झत्ति दिट्ठा सुहावेइ ।। २७ ।।

इत्यादिवाक्यगतैर्व्यङ्ग्यैस्तस्य विरहार्तैरनुग्राह्यत्वात् ।। २४ ।। **२५**) गणिका मात्रा पृष्टाह । **जं जं सो**— 'यं यं स निध्यायति अङ्गावकाशं ममानिमिषाक्षः । प्रच्छादयामि च तं तमिच्छामि च तेन दृश्यमानम् ।।' अत्र काचिद् वारविलासिनी मात्रा वल्लभेनावर्जनाय कौशलं पृष्टा तां प्रति, स कामी मम यद्यदङ्गं रसावेशादनिमिषाक्षः पश्यति तत्तदङ्गं प्रच्छादयामि च तेन दृश्यमानमिच्छामीत्यनेन दर्शनेऽन्यतोऽपि निवर्तते, अदर्शने क्लेशात्तस्य द्वेषो भविष्यतीत्यन्तरा किंचित् प्रदर्श्य तस्याभिलाषो यथा न निवर्तते तथा विलोपयामीति कथितवतीति भावः । युक्तिरलंकारः । " अयुज्यमानस्य मिथः शब्दस्यार्थस्य वा पुनः । योजना क्रियते या सा युक्तिरित्यभिधीयते ।। " अत्र स्वतः सिद्धार्थशक्तिमूलोऽलंकारेण वस्तुध्वनिः, युक्त्या प्रियावर्जनकौशलस्य द्योत्यत्वात् ।। २५ ।। **२६**) काचिद् दूती राजकन्यकां प्रति भीरुं युवानं प्रोत्साहयति । **आरंभंतस्स**– 'आरभमाणस्य धुरं लक्ष्मीर्मरणं वा भवति पुरुषस्य । तस्य मरणमनारम्भे ऽपि भवति लक्ष्मीः पुनर्न भवति ।।' अत्र काचिद्विदग्धा दूती राजकन्यकामभिलषन्तं भीरुं युवानं, ध्रुवं महाकार्यमारभमाणस्य लक्ष्मीर्मरणं वा भवति । तदनारम्भेऽपि मरणं भवति । लक्ष्मीः पुनर्न भवतीत्यनेन " उद्योगानुसारिणी लक्ष्मीः " इति वचनत्वात् सहचरमाह । उद्योगेनैव लक्ष्मीः प्राप्यते । अतो भीरुतां विहाय लक्ष्मीसदृशीमेनां प्राप्तुमुद्योगः क्रियतामिति प्रोत्साहयतीत्यभिप्रायः । अत्र स्वतःसिद्धार्थशक्तिमूलो वस्तुध्वनिः, अलंकारध्वनिः, रूपकस्य गम्यमानत्वात् ।। २६ ।। **२७**) अत्र काचित्सहचरमाह । **अच्छउ**—'आस्तां तावन्मनोहरं प्रियाया मुखदर्शनमतिमहार्घम् । तद्ग्रामक्षेत्रसीमापि झटिति दृष्टा सुखयति ।।' **अच्छउ** इत्यत्र " छर्गमिष्यमासाम् " इत्युक्तम् । अत्र कश्चिद्युवा प्रियतमानिवासभूतं ग्राममागतः । तद्ग्रामसीमानमासाद्य संजातहर्षः सन्, अये सहचर, प्रियाया अतिमहार्घं मनोहरं मुखदर्शनमास्तां

---

1 M T एआए ।

W 332) सूरच्छलेण पुत्तिऍ कस्स तुमं अंजलिं पणामेसि ।
हास-कडक्खुम्मीसा ण होंति देवाण[1] जोक्कारा ॥ २८ ॥

W 876) ठाणे ठाणे वलिआ वलणे वलणे स-वेडस[2]-कुडुंगा ।
ण गओ सि मज्झ गामं[3] देअर ण दिट्ठा तुए मुरला ॥२९॥

W 87) अवलंबिअ-माण-परम्मुहीए एंतस्स माणिणि पिअस्स ।
पिट्ठ-पुलउग्गमो तुह कहेइ समुहट्ठिअं हिअअं ॥३०॥

तावत् । तज्जनितनिरतिशयसुखविशेष ईदृश इति केन वर्णयितुं शक्यते । तत्संबन्धतया ग्रामक्षेत्रसीमापि दृष्टा झटितीत्येवं सुखयतीति तस्या रूपयौवनलावण्यातिशयेन लोकोत्तरतां स्वकीयम् अनुरागं च प्रकटितवानित्यभिप्रायः । अत्र संलक्ष्यक्रमस्मृतिपरिपुष्टो भावध्वनिः, अनुरागातिशयस्य प्रतीतेः ॥ २७ ॥ २८) काचिद्विदग्धा कांचिदाह । **सूरच्छलेण**– ' सूर्यच्छलेन पुत्रिके कस्य त्वमञ्जलिं समर्पयसि । हासकटाक्षोन्मिश्रा न भवन्ति देवानां जयकाराः[4] ॥' अत्र काचिच्च–लितचारित्रमुद्रा पूर्वमविदितचारित्रभङ्गां प्रातिवेशिकीं प्रति, हे पुत्रिके, त्वं सूर्यमपदिश्य कस्मा अञ्जलिं समर्पयसि । सूर्यायैवेति चेत् तदयुक्तम् । यतो देवानां नमस्कारा हासकटाक्षोन्मिश्रा न भवन्तीत्यनेन त्वं विलासहासकटाक्षवीक्षणेन यं कंचन युवानं साभिलाषमवलोकयसि त्वच्चरितं मया ज्ञातमिति तां स्ववशीकर्तुमाहेत्यभिप्रायः । अत्र स्वतःसिद्धार्थशक्तिमूलो वस्तुध्वनिः, अलंकारेण ज्ञापकत्वहेतुना त्वच्चरितं मया ज्ञातमिति व्यज्यमानत्वात् ॥२८॥ २९) काचिद्देवरमाह । **ठाणे ठाणे**– 'स्थाने स्थाने वलिता वलने वलने सवेतसकुडुङ्गा । न गतोऽस्यस्माकं [ग्रामं] देवर [न] दृष्टा त्वया मुरला॥'काचिदत्र देवरानुरक्ता श्वशुरग्रामे यत्र क्वापि सुखेन संकेतस्थानमलभमाना, हे देवर, निश्चितपितृग्रामगमना पूर्वमस्माकं ग्रामं न गतोऽसि । स्थाने स्थाने वलिता वलने वलने सवेतसकुडुंगा मुरला त्वया न दृष्टा । नेति काकुद्वयेन पृच्छन्ती मुरलावर्णनयास्मद्ग्रामे तत्र तत्र संकेतस्थानस्य सुलभत्वान्निःशङ्कं सुरतक्रीडा तत्र संभविष्यतीति स्वग्रामगमनाय तं प्रोत्साहयतीति भावः । प्ररोचनालंकारः । "प्रोत्साहनार्थायान्येषां प्रशंसा सा प्ररोचना ।" अतः स्वतःसिद्धार्थशक्तिमूलो[5]ऽलंकारेण वस्तुध्वनिः । प्ररोचनया ग्रामगमनप्रोत्साहनस्य गम्यमानत्वात् ॥२९॥ ३०) सखी नायिकां विडम्बयति । **अवलम्बिअ**– ' अवलम्बितमानपराङ्मुख्या यतो गच्छतः

1 M T देव्वाण । 2 MT वेतस । 3 M ठामं T शर्मं । 4 M T देवानञ्जलिकराः ।
5 T मूलेन अलं० ।

W 506) तुह दंसण-सत्तिण्हा सद्दं सोऊण णिग्गआ जाइं ।
तुइ वोलंते ताइं[1] पआइ वोढव्विआ जाआ ॥ ३१ ॥

W 651) जाइ वअणाइ अम्हे वि जंपिमो जाइ जंपइ जणो वि ।
ताइ च्चिअ[2] तेण पअंपिआइ हिअअं सुहावेंति[3] ॥३२॥

मानिनि प्रियस्य ।[4] पृष्ठपुलकोद्गमस्तव कथयति संमुखस्थितं हृदयम् ॥ ' अत्र काचिद् विदग्धा सखी अनुनयन्तमायान्तं कान्तमनादृत्य मानमवलम्ब्य निर्यान्तीं सखीं प्रति विपरीतलक्षणया मानिनीति संबोध्यानुनयति । प्रियतमे, किमर्थं पराङ्मुखी यासि । तत्संसर्गसंभवस्तव पृष्ठपुलकोद्गमस्त्वद्धृदयं तदभिमुखं कथयतीति सोत्प्रासमुक्त्वा वृथामानेनालमिति तां मानान्निवारयतीति भावः । अत्र वस्तुना संकीर्णोऽलंकारध्वनिः, मानिनीपदव्यङ्ग्येनाक्षेपस्यानुग्राह्यत्वात् ॥३०॥ ३१) काचिद्दूती नायकमाह । **तुह दंसणे–** ' तव दर्शने सतृष्णा शब्दं श्रुत्वा निर्गता यानि । त्वय्यपक्रामति तान्येव पदानि वोढव्या जाता ॥ ' अत्र काचिद् विदग्धा दूती नायकस्य पुरस्तात् [कथयति] । विरहिणी नायिका त्वयि यदृच्छया तेन पथा संचरमाणे सति त्वदालापमाकर्ण्य भवद्दर्शनोत्कण्ठिता यानि पदानि यावन्तं पन्थानं निर्गता तथा त्वय्यपक्रामति सति त्वद्दर्शनालाभेन विषण्णा तापावसन्नगात्रतया तानि पदानि प्रतिगन्तुमुक्ता[5] वोढव्या जातेति तस्या निर्भरमवस्थाविशेषं सूचयन्ती त्वयेयं संभावनीयेति तं प्रोत्साहयतीत्यभिप्रायः । अत्र संलक्ष्यध्वनिः, औत्सुक्यग्लानि-विषादपरिपुष्टस्य पूर्वानुरागविप्रलम्भस्य प्रतीतेः ॥३१॥ ३२) मुग्धा सखीमाह । **जाइ वअणाइ–** ' यानि वचनानि वयमपि जल्पामो यानि जल्पति जनोऽपि । तान्येव तेन प्रजल्पितानि हृदयं सुखयन्ति ॥ ' अत्र कयाचिन्मुग्धया कस्मिंश्चित् कृताभिलाषया तत्संगमनुभूय सखीनां पुरस्तादस्माभिर्जनेन च यानि वचनानि जल्प्यन्ते तान्येव तेन प्रजल्पितानि हृदयं सुखयन्तीत्यनेनानुरागत्वात् प्रियसंबन्धि सर्वमपि मनोहरमिति मौग्ध्यादजानन्त्या साश्चर्यं तदुच्चरितवचनानां माधुर्यकथनेन स्वकीयानुरागातिशयः प्रकटित इत्यभिप्रायः । हेतुरलंकारः, तत्प्रजल्पनस्य सुखनिमित्तत्वात् । अत्रासंलक्ष्यक्रमसंसृष्टो भावध्वनिः, मौढ्यानुरागयोः

---

1 M T add चिअ after ताइं । 2 M T ताइं व देण । 3 सुहाअंति । 4 M पृष्ठे ।
5 M T° मुक्ते ।

W 350) **वण्णंतीहि तुह गुणे बहुसो अम्हेहि छिंछई-पुरओ ।**
बालअ सअं चिअ कओ सि दुल्लहो कस्स कुप्पामो ॥ ३३ ॥

W 91) **णूमंति जे पहुत्तं कुविअं दास व्व जे पसाअंति ।**
ते च्चिअ महिलाण पिआ सेसा सामि च्चिअ वराआ ॥ ३४ ॥

W 249) **अज्ज मए गंतव्वं तस्स सआसं घणंधआरे त्ति ।**
बाला णिमीलिअच्छि पअ-परिवाडिं घरे कुणइ ॥ ३५ ॥

प्रतीयमानत्वात् ॥ ३२ ॥ **३३)** काचिज्जारमुपालभते । **वण्णंतीहि**—'वर्णयन्तीभिस्तव गुणान् बहुशोऽस्माभिरसतीनां पुरतः । बालक स्वयमेव कृतोऽसि दुर्लभः कस्मै कुप्यामः ॥' अत्र काचिदसच्चरिता पूर्वं यथेच्छमुपभुक्तमिदानीमन्यासंगवशाद् दुर्लभदर्शनमुपपतिं प्रति, हे बालक, तव गुणान्[1] रूपादीनसतीनां पुरो वर्णयन्तीभिरस्माभिः स्वयमात्मनैव दुर्लभः कृतोऽसि, कस्मै कुप्याम इत्यनेनास्मन्निमित्त एवान्यासंगस्तेनासंगेनैवायं जनो न स्मर्यते । ममैवेदमकुशलमित्यात्मोपालम्भव्याजेन तमुपालभत इत्यभिप्रायः । हेतुरलंकारः, गुणवर्णनस्य दुर्लभत्वहेतुत्वात् । अत्र स्वतःसिद्धार्थशक्तिवस्तुमूलेन वस्तुध्वनिः, आत्मोपालम्भेन तदुपालम्भस्य गम्यमानत्वात् ॥ ३३ ॥ **३४)** काचित् सखीमाह । **णूमंति**—'प्रच्छादयन्ति ये प्रभुत्वं कुपितां दास इव ये प्रसादयन्ति । त एव महिलानां प्रियाः शेषाः स्वामिन एव वराकाः ॥' "छादेर्णूमणुमोव्वालढक्कपव्वालसंतुमाः" इति छादेर्णूमादेशः । अत्र काचित् सख्या भर्तुरनुरागस्त्वयि कीदृश इति पृष्टा तां प्रति, ये स्त्रीणां पुरतः प्रभुत्वं न दर्शयन्ति, कुपितां दास[वदु]पचरन्ति त एव महिलानां प्रियाः, शेषा वराकाः स्वामिन एवेत्यनेनैष दुरात्मा बहुशोऽपराधान् कृत्वा कदाचिदपि मां नानुनयति, प्रभुत्वं दर्शयित्वा व्यथयतीति विषण्णा तस्यानुरागाभावं प्रकटितवतीत्यभिप्रायः । अत्र [2] वाक्यगतासंलक्ष्यक्रमो भावध्वनिः, विषादस्य प्रतीतेः ॥ ३४ ॥ **३५)** कस्याश्चिद् वचनम् । **अज्ज मए**— 'अद्य मया गन्तव्यं तस्य सकाशं घनान्धकार इति । बाला निमीलिताक्षी पदपरिपाटीं गृहे कुरुते ॥' एषा बालिका प्रियतमेन कथितसंकेता घनसमये मेघाक्रान्तमम्बरं दृष्ट्वा अद्य मया घनान्धकारे तस्य समीपमवश्यं गन्तव्यमिति मत्वा

---

1 T गुणादीम् । 2 T वाक्यगत ।

W 33) उण्हं[1] विणीससंतो कीस मम परम्मुहीएँ सअणद्धे ।
हिअअं पलीविउं अणुसएण पिट्ठं पलीवेसि ॥ ३६ ॥

W 664) खाणेण अ पाणेण अ तह गहिओ मंडलो अडअणाए ।
अणुमण्णइ जह जारं भुंकइ घर-सामिए एंते ॥ ३७ ॥

W 182) महिला-सहस्स-भरिए तुह हिअएँ सुहअ ठाणं अलहंती ।
णिच्चं अणण्ण-कम्मा अंगं तणुअं पि तणुएइ ॥ ३८ ॥

निमीलिताक्षी गृहे पदानुक्रमं करोतीत्यनेनास्या मुग्धायाः प्रियानुसरणे उत्कंठां पश्येति काचित्सहचरीमाहेत्यभिप्रायः । अत्र स्वतःसिद्धार्थशक्तिमूलो वस्तुनासंकीर्णध्वनिः, मौढ्योत्सुक्ययोर्निमीलिताक्षी पदपरिपाटीं गृहे करोतीत्यनेन व्यञ्जकानुप्रवेशात् ॥३५॥ **३६**) काचित् प्रियमुपालभते । **उण्हं**– ' उष्णं विनिःश्वसन् कस्मान्मम पराङ्मुख्याः शयनार्धे । हृदयं प्रदीप्यानुशयेन पृष्ठं प्रदीपयसि ॥' अत्र काचित् स्वकीया नायिका पश्चाच्छयनार्धे शयानं पतिं प्रति, पूर्वमपराधशतैर्मम हृदयं त्वया प्रज्वलितमिदानीमुष्णं विनिःश्वसन्ननुशयेन पश्चाद्भागमपि किमर्थं प्रज्वलयसीत्यनेन शठापसरेति रोषसंतापातिशयेन तं भर्त्सितवतीत्यभिप्रायः ।[2] अत्रासंलक्ष्यक्रमव्यङ्ग्यः संकीर्णो भावध्वनिः, उष्णं विनिःश्वसन्नित्यनेन प्रतीयमानत्वात् ॥३६॥ **३७**) काचिदसती कस्याश्चिदसत्याः कौशलमाह । **खाणेण**– ' खादनेन पानेन च तथा गृहीतो मण्डलो ऽसत्या । अनुमन्यते यथा जारं भषति गृहस्वामिन्यायाते ॥' अत्र **अडअणा** इत्यसती, " बरइत्त " आदिषु पठ्यते । अत्र काचिदात्मानमविश्वस्य पत्या स्वरक्षणार्थं गृहे स्थापितं शुनकं जारहस्तेन प्रदापितैरन्नपानैस्तदागमनं यथानुमन्यते तथावश्यं कृत्वा गृहपतिना त्वदर्थं सज्जीकृतमन्नपानादिकमनेन भक्षितमिति ताडयित्वा तदागमने यथा भषति तथाविधं कृत्वा तस्य मनसि मय्यागतेऽप्ययमेवं भषति, किं पुनरन्यस्मिन् जन इत्येवंविधप्रत्ययोत्पादनेन तं वञ्चयतीति काचित्सखीमाहेत्यभिप्रायः । अत्र स्वतःसिद्धार्थशक्तिमूलोऽलंकारेण वस्तुध्वनिः युक्त्या पतिवञ्चनस्य प्रतीतेः ॥ ३७ ॥ **३८**) दूती नायकमाह । **महिला**– 'महिलासहस्रभरिते तव हृदये [सुभग] स्थानमलभमाना । नित्यमनन्यकर्मा अङ्गं तन्वपि तनूयति ॥' अत्र काचिद्दूती नायकं [प्रति] हे सुभग, एवंविधा मम सखी त्वच्चित्तं प्रवेष्टुम् एवंविधा

---

1 M T उण्णं । 2 T अत्र सं ।

W 939) तइआ मह गंडत्थल-णिमिअं दिट्ठिं ण णेसि अण्णत्तो ।
एण्हिं स च्चेअ अहं ते अ कवोला ण सा दिट्ठी ॥ ३९ ॥

W 583) धणिअं[1] उवगूहिअ मएँ कुक्कुड-सद्देण झत्ति पडिबुद्धो ।
पर-वसइ-वास-संकिर णिअअम्मि घरे सि मा भाहि ॥ ४० ॥

W 954) अणुदिअह-कआभोआ[2] जहजह थणआ विणिंति कुमरीए ।
तह तह लद्धोआसो व्व वम्महो हिअअमाविसइ ॥ ४१ ॥

भवतीत्यनेन तव हृदये प्रवेशाभावादियमेतादृशीमवस्थां प्राप्ता । तस्मादनुगम्यतामिति तं प्रोत्साहयतीत्यभिप्रायः । अत्र वाक्यप्रकाश्यः कविनिबद्धवक्तृप्रौढोक्तिसिद्धार्थ-शक्तिमूलो ऽलंकारेणालंकारध्वनिः, हेत्वलंकारेण तनोस्तनूकरणे ऽपि तव हृदयं न विशतीति विशेषोक्तेर्गम्यमानत्वात् । " कारणे सति कार्यानुत्पत्तिर्विशेषोक्तिः " इत्युक्तम् ॥ ३८ ॥ ३९) नायिका नायकमुपालभते । **तइआ मह–** ' तदा मम गण्डस्थलस्थापितां दृष्टिं न नयसि अन्यतः । इदानीं सैवाहं तावेव कपोलौ न सा दृष्टिः ॥' **णिमिअ–**शब्दः स्थापितवाची देश्यः " अपुण्ण " आदिषु पठितः । अत्र नायिका पुरःस्थितं मणिमुकुरसमानावात्मकपोलावत्यादरेण सादरं विलोक्य पश्चात्तादृगनुरागरहितं नायकं प्रति, सर्वं तदेव, दृष्टिस्तु सा न भविष्यत्यनेनेतस्ततः पार्श्वयोः संचरन्तीं मत्कपोलप्रतिबिम्बितां सखीमवलोकयन् साभिलाषदृष्टिरासीः । इदानीं तस्यामपक्रान्तायां दृष्टिरेतादृशी जाता । अत एव वञ्चक, तव शाठ्यं विदितमासीदिति तमुपालभत इत्यभिप्रायः । अतः स्वतःसिद्धार्थशक्तिमूलो वस्तुना वस्तुध्वनिः, अनेन वाक्यार्थेन शाठ्योद्घाटनस्य वस्तुनो गम्यमानत्वात् ॥३९॥ ४०) नायिका पतिमुपालभते । नायिका भर्तार-मुपालभते । नायिका धवमुपालभते । **धणिअं–** ' प्रियतम उपगूढो मया कुक्कुट-शब्देन झटिति प्रबुद्धः । परवसतिवासशङ्काशील, निजे गृहे ऽसि मा बिभिहि ॥' अत्र काचिद्विदग्धा कुलपा[बा]लिका परदारलम्पटं परगृहवासशङ्कया स्वगृहे ऽपि कुक्कुटशब्देन प्रभातं जातमिति सभयं प्रतिबुद्धं पतिं त्वया परगृहेष्वेव सकला रात्रयो नीयन्ते, न कदाचिदपि स्वगृहे स्थीयत इति उपालभत इत्यभिप्रायः । अत्र स्वतःसिद्धार्थशक्तिमूलो वस्तुना वस्तुध्वनिः, वाच्येन प्रियो-पालम्भस्य गम्यमानत्वात् ॥ ४० ॥ ४१) काचिद्युवानमाह । **अणुदिअह–** ' अनुदिवसकृताभोगौ यथा यथा स्तनौ विनिर्यातौ कुमार्याः । तथा तथा

---

1 M T गणिअ । 2 M T कलहोआ ।

W 167) भंजंतस्स वि तुह सग्ग-गामिणो णइ-करंज-साहाओ ।
भण कह अज्ज वि धम्मिअ पाआ धरणिं च्चिअ छिवंति ॥४२॥
W 164) वंकं को पुलइज्जइ कस्स कहिज्जइ सुहं व दुक्खं व ।
केण समं व हसिज्जइ पामर-बहले हअग्गामे ॥ ४३ ॥
W 335) बहलतमा हअ-राई अज्ज पउत्थो पई घरं सुण्णं ।
तह जग्गेसु सअज्झिअ[1] जह अम्हे ण अ मुसिज्जामो ॥ ४४ ॥

लब्धावकाश इव मन्मथो हृदयमाविशति ॥' अत्र कुमार्याः स्तनावित्यादिना इदानीमेषा प्रतिदिनं सविलासहासकटाक्षाभिप्रायवचना जाता, पश्येति काचिद्युवानं प्रोत्साहयतीत्यभिप्रायः । अत्र कविनिबद्धवक्तृप्रौढोक्तिसिद्धार्थ-शक्तिमूलो ऽलङ्कारेण वस्तुध्वनिः। उत्प्रेक्षया विलासहासादिप्रतीतेः ॥ ४१ ॥ ४२) काचित् कुलटा तापसमाह । **भंजंतस्स–** 'भञ्जतो ऽपि तव स्वर्गगामिनो नदीकरञ्जशाखाः । भण कथमद्यापि धार्मिक पादौ धरणीमेव स्पृशतः ॥' अत्र काचिदसच्चरिता प्रतिदिनं शिवपूजार्थमात्मसंकेतभूतकरञ्जशाखाभञ्जकं तमपि देवलकं प्रति, हे धार्मिक, स्वर्गं गन्तुकामेन त्वया प्रतिदिनं करञ्जशाखा भज्यन्ते, तत्कथमद्यापि तव पादौ धरणीमेव स्पृशतः। एतादृशस्यापि पादौ धरण्यां कथं तिष्ठत इत्यनेन हे पापकारिन्, त्वया धर्मबुद्ध्या कृतेनैतद्व्यापारेण स्वर्गो न लभ्यते। अपि तु अधोगतिरेवेत्याक्षिपतीत्यभिप्रायः। विशेषोक्तिरलंकारः। शिवपूजार्थं करञ्जभञ्जने सत्यपि स्वर्गगमनरूपस्य कार्यस्यानुत्पत्तेः। अत्र वाक्यप्रकाश्यसंलक्ष्यक्रमः संकीर्णो भावध्वनिः । धार्मिकादिपदव्यङ्ग्यानुगृहीतस्या-मर्षस्य प्रतीतेः ॥ ४२ ॥ ४३) कस्याश्चिदसत्या निर्वेदोक्तिः। **वंकं–** 'वक्रं को दृश्यते कस्मै कथ्यते सुखं वा दुःखं वा। केन समं प्रहस्यते पामरबहुले हतग्रामे।' काचिद्विदग्धा पूर्वं स्वच्छन्दचारिणी ग्रामान्तरं गता । कयाचिदसत्या कुशलं पृष्टा। पामरबहुले अस्मिन् ग्रामे वक्रविलोकनादि को जानाति। सुखं वा दुःखं वा निवेदयितुं को वार्हः। केन समं नर्महासः क्रियत इत्यनेन साभिलाषत्वसूचकानवगतेर्वक्रदर्शनाद्यनुभावानां विफलत्वेन निर्वेदं प्राप्ता कथंका-रमत्रास्माकं कुशलमिति तां प्रत्युक्तवतीत्यभिप्रायः। हेतुरलंकारः। अत्र वाक्य-प्रकाश्यासंलक्ष्यक्रमो भावध्वनिः, निर्वेदस्य प्रतीतेः ॥४३॥ ४४) काचि-त्प्रातिवेशिकमाह । **बहलतमा–** 'बहलतमा हतरात्रिरद्य प्रोषितपतिर्गृहं शून्यम् । तथा जागृहि प्रातिवेशिक यथा वयं न मुष्यामहे ॥' अत्र काचिज्जनसमक्षमद्य

---

1 M T सअच्चिअ ।

W 372) वड-जक्खो जो अ तह दिण्णो सीसम्मि सह जुआणेहि ।
तं चिअ एण्हिं पणमामि हअ-जरे होसु संतुट्ठा ॥ ४५ ॥

W 100) दुक्खं देंतो[1] वि सुहं जणेइ जो जस्स वल्लहो होइ ।
दइअ-णह-दूमिआण वि वड्ढइ थणाण रोमंचो ॥ ४६ ॥

W 198) बहुसो वि कहिज्जंतं तुह वअणं मज्झ हत्थ-संदिट्ठं ।
ण सुअं ति जंपमाणा पुणरुत्त-सअं कुणइ अज्जा ॥ ४७ ॥

महत्यन्धकारे शून्ये गृहे चौरैरहं यथा न मुष्ये तथा मां प्रतिपालयेत्यनेन प्रार्थना-व्याजेनाहमेकाकिनी त्वया समागन्तव्यमिति विधेः प्रतीतेः ॥ ४४ ॥ **४५)** कस्याश्चिदसत्या निर्वेदोक्तिः । **वडजक्खो–** 'वटयक्षो यश्च तथा दत्तः शीर्षे सह युवभिः । तमेवेदानीं प्रणमामि हतजरे भव संतुष्टा ॥' अत्र काचिदसज्जरती पूर्वं यौवनमदात् वटस्याधः स्थिते यक्षागारे यां यक्षप्रतिमामुपधानीकृत्य युवभिः समं बहुलकालं सुरतसुखान्यनुभूयेदानीं विगलितयौवनमदा तामेव दैवतमिति पूजयामि, हे जरे संतुष्टा भवेत्यनेन त्वयाहमेतादृशीमवस्थां प्रापितेति निर्वेदात् तामुपालभत इत्यभिप्रायः । अत्रासंलक्ष्यक्रमो भावध्वनिः, निर्वेदस्य प्रतीतेः ॥ ४५ ॥ ४६) नायिका सखीमाह । **दुक्खं–** 'दुःखं ददद्पि सुखं जनयति यो यस्य वल्लभो भवति । दयितनखदुःखितयोरपि वर्तते स्तनयो रोमाञ्चः ॥' अत्र सखीभिः प्रियतमापराधान् संसूच्य तवायं दुःखकारी मानः क्रियतामिति बोधिता काचित्तस्मिन्ननुरागातिशयाद्विरहमसहमाना तां प्रति, दुःखं ददद्पि वल्लभः सुखं जनयति । यथा दयितनखव्रणपरिदूनयोरपि स्तनयोर्हर्षेण रोमाञ्चो भवतीत्यनेन किंचिद्दुःखे ऽपि सुखातिशयस्य विद्यमानत्वात् तं विरहय्य क्षणमपि स्थातुं न शक्नोमीति स्वानुरागं प्रकटितवतीत्यभिप्रायः । अत्र निदर्शनालंकारः । अत्र " अर्थान्तरप्रवृत्तेन किंचित् तत्सदृशं फलम् । सदसद्वा निदर्श्येत यदि तत्स्यान्निदर्शनम् । " इत्युक्तत्वात् । अत्रासंलक्ष्यक्रमो भावध्वनिः, अनुरागस्य प्रतीतेः ॥४६॥ ४७) दूती नायकमाह । **बहुसो–** 'बहुशो ऽपि कथ्यमानं तव वचनं मम हस्तसंदिष्टम् । न श्रुतमिति जल्पन्ती पुनरुक्तशतं कारयति वधूः ॥' अत्र काचिच्चतुरा नायिकानुरागपरिज्ञानाय प्रेषिता प्रत्यागत्य नायकं प्रति, तव

---

1 MT दंतो ।

W 254) तह सुण्हाएँ पुलइओ दर-वलिआवंग-तारअं पहिओ ।
जह वारिओ वि घर-सामिएण ओलंबए वसइं ॥ ४८ ॥

W 301) अह अम्ह आगओ कुल-घरोऑ अज्जेत्ति [1]छेंछई जारं ।
सहसागअस्स पइणो तुरिअं कंठम्मि लाएइ ॥ ४९ ॥

W 376) अवरज्झसु वीसद्धं सव्वं तुह सुहअ विसहिमो अम्हे ।
गुण-णिब्भरम्मि हिअए जाणसु दोसा ण माअंति ॥ ५० ॥

संदेशं मन्मुखाद् बहुशः श्रुत्वापि पुनः पुनः संभ्रमकुतूहलेन न श्रुतमिति मां पुनरुक्तशतं कारयतीत्यनेन तस्यास्त्वयि महाननुराग इति सूचितवतीत्यभिप्रायः। अत्रासंलक्ष्यक्रमो भावध्वनिः, अनुरागस्य प्रतीतेः ॥४७॥ ४८) काचिदसतीमाह। **तह–** 'तथा स्नुषयावलोकितः दरवलितापाङ्गतारकं पथिकम् । यथा वारितो ऽपि गृहस्वामिनावलम्बते वसतिम् ॥' अत्र गृहपतिना वारितो ऽपि यथा गृहे वसतिमालम्बते तथावलोकित इत्यनेन एषा श्वशुरादिसंनिधौ तेन सह संलापं कर्तुमशक्ता कटाक्षवीक्षणैरेव स्वाभिप्रायं सकलमस्मै निवेदयति, पश्येति काचिदसतीमाहेत्यभिप्रायः । अत्रासंलक्ष्यक्रमो ऽसंकीर्णो भावध्वनिः, उभयोरनुरागप्रतीतेः ॥४८॥ ४९) काचिदसती सहचरीमाह । **अह अम्ह–** 'असावस्माकमागतः कुलगृहादद्येत्यसती जारम् । सहसागतस्य पत्युस्त्वरितं कण्ठे लगयति ॥' सहसा अतर्कितम् । "अतर्किते तु सहसा ।" इत्यमरः । अत्र काचिदसती स्वैरमुपपतिना सह वर्तमाना सहसा पत्यौ गृहमागते सति 'असावस्माकं कुलगृहादागतः । त्वयैष परिष्वज्यताम्' इति पतिकण्ठे लगयतीत्यनेन प्रत्युत्पन्नमतिस्त्रीभिः को वा न वञ्च्यते, कुलटाकपटं केन वा वेदितुं शक्यते, पश्येति सखीमाहेत्यभिप्रायः । अत्र स्वतःसिद्धार्थशक्तिमूलो ऽलंकारेण वस्तुध्वनिः, युक्त्या तद्वचनस्य प्रतीतेः ॥ ४९ ॥ ५०) काचिन्नायकमुपालभते । **अवरज्झसु–** 'अपराध्य विस्रब्धं सर्वं तव सुभग विषहामहे वयम् । गुणनिर्भरे हृदये जानीहि दोषा न मान्ति ॥' काचित् प्रगल्भा नायिका मुहुर्मुहुरपराधिनं नायकं प्रति, विस्रब्धमपराधान् कुरु । त्वया यत्कृतं तत्सर्वं मया सह्यते । यतस्तव गुणपूर्णे मम हृदये दोषाणामवकाशो नास्तीत्यनेन विपरीतलक्षणया 'हे दुर्भग, तव कश्चिदपि गुणो नास्ति । शतशो ऽपराधाः क्रियन्ते । सह्यत' इति रोषात् तं भर्त्सितवतीत्यभिप्रायः । अत्र लक्षणामूलो वाच्यप्रकाश्यो ऽत्यन्ततिरस्कृताविव-

---

1 MT चिंचरो ।

W 707) रणरणअ-सुण्ण-हिअओ चिंतंतो विरह-दुब्बलं जाअं ।
अगणिअ-णिअ-वसइ च्चिअ वोलीणो गाम-मज्झेण ॥ ५१ ॥

W 124) कइअव-रहिअं पेम्मं णत्थि च्चिअ मामि माणुसे लोए ।
जइ होइ कस्स विरहो होंतइ[1] विरहम्मि को जिअइ ॥ ५२ ॥

W 85) दक्खिण्णएण एंतो सुहअ सुहावेसि अम्ह गेहाइं ।
णिक्कइअवेण जाणं गओ सि का णिव्वुई ताणं ॥ ५३ ॥

क्षितवाच्यध्वनिः,[2] अनेन तद्दर्शनस्य प्रतीतेः ॥५०॥ ५१) काचित् सहचरमाह । **रणरणअ** – ' रणरणकशून्यहृदयश्चिन्तयन् विरहदुर्बलां जायाम् । अगणितनिजवसतिरेवापक्रान्तो ग्राममध्येन ॥ ' एषा देशान्तरादात्मग्राममासाद्य विरहदुर्बला जाया कीदृशीमवस्थां प्राप्तेति चिन्तारणरणकशून्यहृदयो ऽस्यां वीथ्यामात्मीयमगारमिति विस्मरन् मोहाद्ग्राममध्येन निर्यात इत्यनेन सखे अनुरागातिशयेनायमेतादृशविशेषं प्राप्तः पश्येति, कश्चित् सहचरमाहेत्यभिप्रायः । अत्र वाक्यगतासंलक्ष्यक्रमो रसध्वनिः, प्रवासविप्रलम्भस्य प्रतीतेः ॥५१॥ ५२) नायिका सखीमाह । **कइअव**– ' कैतवविरहितं प्रेम नास्त्येव सखि मानुषे लोके । यदि भवति कस्य विरहो भवति च विरहे को जीवति ॥ ' अत्र काचित् स्वाधीनपतिका पत्यौ निरतिशयप्रेमानुबद्धा विरहे क्षणमपि न शक्यं जीवितुमिति मन्वाना तस्मिन् प्रोषिते प्राणान् धारयन्ती सख्याः पुरस्तात्, ' हे सखि, मानुषे लोके निष्कैतवं प्रेम नास्त्येव । यद्यस्ति कस्य विरहः । यथाकथंचित् विरहे सति केन वा जीव्यत इत्यनेन मया विरहः सह्यते, जीवितमपि धार्यते । मम प्रेम सकैतवम् ', इत्यात्मानमुपालभत इत्यभिप्रायः । हेतुरलंकारः । निष्कैतवप्रेम्णो विरहाभावनिमित्तत्वात् । अत्र वाक्यप्रकाश्यो ऽसंलक्ष्यक्रमो भावध्वनिः, निर्वेदस्य प्रतीतेः ॥ ॥ ५२ ॥ ५३) नायिका नायकमाह । **दक्खिण्णएण**– ' दाक्षिण्येनायन् सुभग सुखयस्यस्माकं गृहाणि । निष्कैतवेन यासां गतो ऽसि का निर्वृतिस्तासाम् ॥ ' अत्र काचित् प्रगल्भा धीरा नायिका यथाकथंचित् गृहमागतं नायकं प्रति, हे सुभग, दाक्षिण्येनास्मानेवं सुखयसि ।[3] सहजप्रेम्णा यासां गृहाणि गच्छसि तासां कीदृशं सुखमित्यनेनेन, तव यत्राभिरतिस्तत्रैव स्थातव्यम् । किमर्थमस्मान् खेदयितुमागच्छसि इति तमाक्षिपतीत्यभिप्रायः । अत्र वाक्यप्रतिवाक्यात्यन्ततिरस्कृताविवक्षितवाच्यो ध्वनिः, अनेन तद्धर्त्सनस्य प्रतीतेः ॥ ५३ ॥

---

1 MT होस्सइ । 2 MT वाक्य । 3 T असाकं सुखयसि ।

W 554) एद्दहमेत्तग्गामे ण पडइ भिक्ख त्ति कीस मं भणसि ।
धम्मिअ करंज-भंजअ जं जीअसि तं पि दे बहुअं ॥ ५४ ॥

W 173) सिहि-पेहुणावअंसा वहुआ वाहस्स गव्विरी भमइ ।
गअ-मोत्तिअ-गहिअ-पसाहणाण मज्झे सवत्तीणं ॥ ५५ ॥

W 938) पच्चक्ख-मंतु-कारअ जइ चुंबसि मह इमे हअ-कवोले ।
ता मज्झ पिअ-सहीए विसेसओ कीस तण्णाओ ॥ ५६ ॥

---

५४) काचिदसती देवलकमुपालभते । **एद्दह**– 'एतावन्मात्रे ग्रामे न पतति भिक्षेति कस्मान् मां भणसि । धार्मिक करञ्जभञ्जक यज्जीवसि तदपि ते बहु ॥ ' अत्र काचित् कुलटा महत्यपि ग्रामे काचिदपि भिक्षां न ददातीति खिद्यमानं देवलं प्रति विपरीतलक्षणया तमपकारिणं धार्मिकेति संबोध्यास्मिन् ग्राम इत्यादिना सर्वासामस्माकं संकेतभूतकरञ्जभञ्जनापराधेन दण्ड्यस्य कुतो भिक्षेति तं भर्त्सितवतीत्यभिप्रायः । अत्र[1] पदप्रकाश्यस्वतःसिद्धार्थशक्तिमूलो ऽसंकीर्णो वस्तुना वस्तुध्वनिः, धार्मिकपदप्रकाश्यव्यङ्ग्यस्यानुगृहीतत्वात् ॥ ५४ ॥ **५५**) काचित् सहचरीमाह । **सिहि**– 'शिखिबर्हावतंसा वधूर्व्याधस्य गर्विता भ्रमति । गजमौक्तिकगृहीतप्रसाधनानां मध्ये सपत्नीनाम् ॥' **पेहुण** इति बर्हवाची देश्यः, "झाड" आदिषु पठितः । अत्र व्याधस्य वधूर्गजमौक्तिकगृहीतमण्डनानां सपत्नीनां मध्ये बर्हावतंसगर्विता भ्रमतीत्यनेन, पतिर्मय्यासक्ततया निरन्तरसुरतखिन्नो मौक्तिकार्थं गजान् व्यापादयितुमसमर्थः सन् मम बर्हमेवावतंसीकृतवान् । युष्मास्वनुरागाभावादखिन्नतया गजान् व्यापाद्य मौक्तिकानि युष्मभ्यं दत्तवानिति स्वसौभाग्येन गर्विता भ्रमति पश्येति सहचरीमाहेत्यभिप्रायः । अत्र गुणीभूतव्यङ्ग्ययोः संसृष्टिः । बर्हावतंसगजमौक्तिकप्रसाधनपदव्यङ्ग्ययोर्वाच्य[2]सिद्ध्यङ्गयोः संसर्गात् ॥ ५५ ॥ **५६**) नायिका नायकमुपालभते । **पच्चक्ख**– 'प्रत्यक्षमन्तुकारक यदि चुम्बसि मम इमौ हतकपोलौ । तस्मान्मम प्रियसख्या विशेषकः कस्मादार्द्रः ॥' **तण्णाअ**–शब्द आर्द्रवाची । "वरइत्त" आदिषु पठितः । अत्र काचिन्नायिका स्वकपोलप्रतिबिम्बितं सखीमुखं चुम्बन्तं नायकं प्रति, हे प्रत्यक्षापराधकारक, यत्राभिरतिस्तत्रैव स्थातव्यम् । किमस्मान् खेदयितुमागच्छसीति तामाक्षिपतीत्यभिप्रायः । अपराधकारक इति इमौ कपोलौ चुम्बसि

---

1 M प्रकाश्यव्यङ्ग्यकरञ्जभञ्जकपदप्रकाश्यव्यङ्ग्य० । 2 T राजमाक्तिकयोः वाच्य० ।

W 231) तस्स अ सोहग्ग-गुणं अमहिला-सरिसं च साहसं मज्झ ।
जाणइ गोलाऊरो[1] वरिसाआलद्धरत्तो अ ॥ ५७ ॥

W 175) भम धम्मिअ वीसद्धं सो सुणओ अज्ज मारिओ तेण[2] ।
गोलाअड[3] -विअड-कुडुंग-वासिणा दरिअ-सीहेण ॥ ५८ ॥

यदि तर्हि प्रियसख्यास्तिलकः कस्मादार्द्र इत्यनेन शठ, त्वया मत्कपोलचुम्बन-व्याजेन प्रतिबिम्बितं सखीमुखं चुम्ब्यते । नो चेत् कथं तस्याः सात्विकादय[4] इति तमाक्षिपतीत्यभिप्रायः । अत्र स्वतःसिद्धार्थशक्तिमूलो ऽलंकारेण संसृष्टो वस्तुध्वनिः, तिलकार्द्रतानुमानस्य सखीमुखचुम्बनस्य हतपदप्रकाश्येन कपोलचुम्बनेन सह संसर्गात् ॥ ५६ ॥ ५७) कस्याश्चिदसत्या वचनम् । **तस्स–** 'तस्य च सौभाग्यगुणम् अमहिलासदृशं च साहसं मम । जानाति गोदापूरो वर्षाकालार्ध-रात्रश्च ॥' अत्र काचिदसच्चरिता सख्याः पुरस्तादुद्दामयौवनाहमुपारूढमन्मथ-व्यथावेशा तत्सौभाग्यगुणेनाकृष्टमहासाहसिकी गर्जद्घनान्धकारभयंकरेषु अर्धरात्रेषु महान्तमुभयकूलंकषं गोदावरीपूरमुत्तीर्य तत्र तेन समं सुखान्यनुभूय पुनरप्या-गच्छामि । अत्र मम साहसस्य च तत्सौभाग्यस्य च गोदावरीपूरो वर्षार्धरात्रश्च साक्षिणाविति स्ववृत्तान्तकथनेन साहसकरणाय तां प्रोत्साहितवतीत्यभिप्रायः । अत्र स्वतःसिद्धार्थशक्तिमूलो वस्तुना वस्तुध्वनिः । अत्र प्रोत्साहनस्य गम्यमान-त्वात् ॥ ५७ ॥ ५८) काचिद् देवलकमाह । **भम–** 'भ्रम धार्मिक विस्रब्धं स शुनको ऽद्य मारितस्तेन । गोदातटविकटकुडुङ्गवासिना दृप्तसिंहेन ॥' **दरिअ–** इत्यत्र "दृप्ते ऽरिप्ता" इति दृप्तशब्दे पकारतकाराभ्यां सह [ऋ] कारस्य 'अरि'– इत्ययमादेशो भवति । अत्र काचित् कुलटा भिक्षार्थिनं शुनकभयात् गृहं प्रवेष्टुमक्षमं देवलकं प्रति, ' हे धार्मिक, अद्य स शुनको गोदावरीतट-निकुञ्जवाटीषु संचरन्तं देवलकं तत्र सिंहो ऽस्तीति भयमुत्पाद्य तत्संचारं निवारितवतीत्यभिप्रायः । अत्र हेतुरलंकारः । शुनकमरणस्य विस्रब्ध-संचारहेतुत्वात् । अत्र स्वतःसिद्धार्थशक्तिमूलो वाक्यप्रकाश्याविधिरूपेण वस्तुना निषेधरूपो वस्तुध्वनिः । विस्रब्धं भ्रमेति विधिना तत्र न संच-

---

1 M T गोआऊरो । 2 M T देण । 3 M T गोआतड । 4 T सात्विकोदय ।

W 237) पइ-पुरओ च्चिअ णिज्जइ विंचुअ[1]-दट्ठेत्ति जार-वेज्ज-घरं ।
सहिअअ-सहिअण-पसरिअ-कर-जुअलंदोलिरी अज्ज ॥५९॥

W 440) सेउल्लिअ-सव्वंगी णामग्गहणेण तस्स सुहअस्स ।
दूइं अप्पाहेंती[2] तस्स च्चिअ घरंगणं पत्ता ॥ ६० ॥

W 688) मा वच्चसु वीसंभं इमाण बहु-चाडु-कम्म-णिउणाण ।
णिव्वत्तिअ-कज्ज-परम्मुहाण सुणआण व खलाण ॥ ६१ ॥

रितव्यमिति निषेधस्य प्रतीतेः ॥ ५८ ॥ ५९) काचित् सहचरीमाह । **पइ**– ‘ पतिपुरत एव नीयते वृश्चिकदष्टेति जारवैद्यगृहम् । सहृदयसखीजन-प्रसारितकरयुगलान्दोलिनी अद्य ॥ ’ अत्र काचिदसच्चरिता उपपतिनानुरागपरीक्षार्थं पतिसमक्षमेव त्वया मद्गृहमागन्तव्यमिति नियोजिता सती वृश्चिकदष्टास्मीति सखीभिरुह्यमाना पत्युः पश्यत एव जारवैद्यगृहं नीयत इत्यनेन अस्या वञ्चनाचातुरीं पश्येति काचित्सहचरीमाहेत्यभिप्रायः । अत्र स्वतःसिद्धार्थशक्तिमूलो ऽलंकारेण वस्तुध्वनिः, युक्त्या वञ्चनचातुर्यस्य प्रतीतेः ॥ ५९ ॥ ६०) कश्चित्सहचरमाह । **सेओल्लिअ**– ‘ स्वेदार्द्रीकृतसर्वाङ्गी नामग्रहणेन तस्य सुभगस्य । दूतीं संदिशन्ती तस्यैव गृहाङ्गणं प्राप्ता ॥’ **अप्पाहंती**–इति “ संदिशो ऽप्पाहः ” इति **अप्पाह**– आदेशः । अत्र काचित् प्रियमानेतुं दूतीं संदिश्य तन्नामधेयग्रहणात् स्वेदार्द्रिताङ्गी तस्यां प्रस्थितायां तामनुसृत्य पुनः पुनः संदेशशेषं[3] कथयन्ती रसातिशयादविदितसंचारितपदा तस्य गृहाङ्गणं प्राप्तेत्यनेनानुरागं पश्येति कश्चिदाहेत्यभिप्रायः । अत्र वाक्यप्रकाश्यो ऽसंलक्ष्यक्रमो भावध्वनिः, औत्सुक्यस्य प्रतीतेः ॥ ६० ॥ ६१) वेश्या दुहितरमाह । **मा वच्चसु**– ‘ मा व्रज विस्रम्भमेषां[4] बहुचाटुकर्मनिपुणानाम् । निर्वर्तितकार्य-पराङ्मुखानां शुनकानामिव खलानाम्॥’ **वच्चसु** इत्यत्र “ चर्नृतिमदिव्रजाम् ” इति व्रजेरित्यस्य चकारादेशः। अत्र काचिद्वेश्यामाता दुहितरं प्रति, त्वत्संभोगलोलुपतया प्रथमं बहुचाटुकर्मनिपुणानां संभोगे निर्वृत्ते सति शुनकानां [इव] पराङ्मुखानां विश्वासं मा व्रजेत्यनेन पूर्वमेव त्वया तेभ्यो धनं ग्रहीतव्यम् । पश्चान्न ददतीति कथितवतीत्यभिप्रायः। अत्रोपमालंकारः। स्वतःसिद्धार्थशक्तिमूलो वस्तुना वस्तुध्वनिः,

---

1 विंचिअ। 2 MT अप्पाहंती। 3 M संदेहशेषं। 4 MT विस्रब्धमेषां।

W 743) भिउडीएँ पुलोइस्सं णिब्भच्छिस्सं परम्मुही होस्सं ।
जं भणह तं करिस्सं सहीओ जइ तं ण पेक्खिस्सं ॥ ६२ ॥
W 532) ओसरइ धुणइ साहं भंभा-मुहलो पुणो समुल्लिहइ ।
जंबू-फलं ण गेण्हइ[1] भमरो त्ति कई पुढम-डक्को[2] ॥ ६३ ॥
W 499) कत्तो खेमं कत्तो जो सो खुज्जंबओ घरद्दारे ।
तस्स किर मत्थओवरि को वि अणत्थो समुप्पण्णो ॥ ६४ ॥

अनेन प्रथममेव धनं ग्रहीतव्यमिति वस्तुनः प्रतीतेः ॥ ६१ ॥ ६२) नायिका सखीमाह । **भिउडीए–** " भृकुट्या विलोकयिष्यामि निर्भर्त्सयिष्यामि पराङ्मुखी भविष्यामि । यद्भणत तत्करिष्यामि हे सख्यो दयितं [यदि तं] न द्रक्ष्यामि ॥" अत्र काचिन्मुग्धा नायिका सखीभिर्मानकरणाय बोधिता ताः प्रति, हे सख्यः, अपराधिनं प्रियमुद्दिश्य भवद्भि [भवतीभि] रुपदिष्टं भृकुटीविलोकनादिकं करिष्यामि, यदि तं न द्रक्ष्यामि, इत्यनेन तस्मिन्नदृष्टे अहमात्मनः प्रभवामि । दृष्टे पुनस्तत्परवशा न प्रभवामीति स्वानुरागं प्रकटितवतीत्यभिप्रायः । अत्र वाक्यप्रकाश्यो ऽसंलक्ष्यक्रमो भावध्वनिः, अनुरागातिशयस्य प्रतीतेः ॥ ६२ ॥ ६३) काचित् सहचरीमाह । **ओसरइ–** ' अपसरति धुनोति शाखां भम्भामुखरः पुनः समाश्रयति । जम्बूफलं न गृह्णाति भ्रमर इति कपिः प्रथमं दष्टः ॥ ' भम्भेत्यनुकरणम् । " कः शक्तमुक्तदष्टमृदुत्वरुग्णेषु " इति दष्टशब्दे संयुक्तस्य कादेशः । " दम्भ-दर " इत्यादिना दस्य डादेशः । अत्र काचित् प्रातिवेशिकी सहचरीं प्रति कपिचेष्टितकथनव्याजेन एष पूर्वं परदारसंगतस्तत्पतिना ताडितः । तथात्यनुरागातिशयादिदानीमपि तद्गृहं प्रवेष्टुकामस्तत्र तामेव दृष्ट्वा अन्यशङ्कया उपसर्तुमक्षमः सन्नापसरति । तदेतज्ज्ञापनार्थं यत्किंचिच्चापलयति । कासादिशब्दंकरे, अयं त इति भर्त्सनवचनाभावाच्चोपसरति,सहसा न प्रविशति, पश्येत्यभिप्रायः । अत्र स्वतःसिद्धार्थशक्तिमूलो वस्तुना वस्तुध्वनिः, कपिचेष्टितकथनेन तच्चेष्टितस्य प्रतीतेः ॥ ६३ ॥ ६४) प्रोषितभर्तृकाया वचनम् । **कत्तो खेमं**–'कुतः क्षेमं कुत यतः स कुब्जाम्रो गृहद्वारे । तस्य किल मस्तकोपरि कोऽप्यनर्थः समुत्पन्नः ॥' अत्र काचित् प्रोषितभर्तृका कयाचित् कुशलं पृष्टा तां प्रति मम क्षेमं कुतः कुतः । निर्वेदातिशयाद् द्विरुक्तिः । मम गृहाङ्गणे यो ऽसौ कुब्जाम्रस्तस्य शिरसि कोऽप्यनर्थ इति मञ्जरीमेनां दृष्ट्वा कथं जीवामीत्यभिप्रायः । अत्र गूढं नाम गुणीभूतव्यङ्ग्ये प्रतीयमानस्य वाच्यायमानत्वात् ॥ ६४ ॥

---

1 M T गण्हइ । 2 M T दक्को ।

W 379) भंडंतीएॅ तिणाइं सिविउं दिण्णाइ जाइ पहिअस्स ।
ताइ चेअ पहाए असई आअड्ढइ रुअंती ॥ ६५ ॥

W 881) अइपिहुलं जल-कुंभं घेत्तूण समागअ म्हि सहि तुरिअं ।
सम-सेअ-सलिल-णीसास-णीसहा वीसमामि खणं ॥ ६६ ॥

W 955) केसा पंडुर-छाआ असई-संगेण चम्म जज्जरिअं ।
चित्तं तुह सोभग्गं गोदा दूइत्तणं कुणइ ॥ ६७ ॥

---

६५) काचित् प्रातिवेशिकी सखीमाह । **भंडंतीए–** 'भर्त्सयन्त्या तृणानि स्वपितुं दत्तानि यानि पथिकस्य । तान्येव प्रभाते असती आकर्षति रुदती ॥' अत्र काचित् प्रातिवेशिकी ययानया कुलटया रात्रावागतेन पथिकेन शयनार्थं तृणानि याचितया तं विलोक्य साभिलाषया गृहजनवञ्चनार्थं तं वृथा भर्त्सयन्त्या यानि तृणानि दत्तानि सेयं प्रभाते तान्येव तृणानि रुदत्याकर्षतीत्यनेनैषु तृणेष्वहं तेन सह विविधानि सुरतान्यनुभूय एतादृशानि कथं त्यजेयमिति रुदती कर्षति, पश्येति सखीमाहेत्यभिप्रायः । अत्रासंलक्ष्यक्रमः संसृष्टो भावध्वनिः, भर्त्स–यन्तीति, रुदती कर्षतीति च पदप्रकाश्ययोरवहित्थाविषादयोः संसृष्टत्वात् ॥ ६५ ॥ ६६) कस्याश्चिद् असत्या वचनम् । **अइ पिहुलं–** 'अतिपृथुलं जलकुम्भं गृहीत्वा समागतास्मि सखि त्वरितम् । श्रमस्वेदसलिलनिःश्वासनिःसहा विश्रमामि क्षणम् ॥' अत्र काचित् जलाहरणाय नदीं गत्वा तत्र केनचिदुपपति–नानुभूतसंभोगजनितश्रमस्वेदादियुक्ता गृहमागम्य कयाचित् प्रतिवेशिन्या जलानयनार्थमाहूयमाना तां प्रति, अतिपृथुलमित्यादिना संभोगजनितं स्वकीयं श्रमादिकमन्यथाशङ्किभ्यः श्वश्वादिभ्यो जलकुम्भाहरणकृतं, न चौर्यरतकृतमिति निवेदयतीत्यभिप्रायः । अत्र स्वतःसिद्धार्थशक्तिमूलो ऽलंकारेण वस्तुध्वनिः, हेतुना चौर्यरतप्रच्छादनस्य प्रतीतेः ॥ ६६ ॥ ६७) कस्याश्चिदसत्या जरत्या वचनम् । **केसा पंडुर-** 'केशाः पाण्डुरच्छाया असतीसंगेन चर्म जर्जरितम् । चित्रं तव सौभाग्यं गोदा दूतीत्वं करोति ॥' अत्र केनचिदुपपतिना प्रकाशं पुष्पाणि दातुम-क्षमेण गोदावरीपूर्वगाङ्गं गत्वा पत्रपुटे निक्षिप्य वा प्रवाहे त्यक्तानि गोदावर्या समा-नीतानि पुष्पाणि गृह्णन्तीं कांचिदसतीं प्रति, काचिज्जरती अहमेवंविधा यत्र कुत्रापि न दृष्टमीदृशं तव सौभाग्यम् । चित्रं गोदा दूत्यं करोतीति अनेन मया ज्ञातं त्वच्चरितमिति तां निवेदितवतीत्यभिप्रायः । अत्र कविप्रौढोक्तिसिद्धार्थशक्तिमूलो

W 956) णीणिद्दं दोब्बल्लं चिंता अलसत्तणं सणीससिअं ।
मह मंद-भाइणीए कए सहि तुमं पि अहह परिभवइ ।। ६८ ।।

W 476) उज्जुअ-रए ण तूसइ वंकम्मि वि आसअं विअप्पेइ ।
एत्थ अभव्वाएँ मए पिए पिअं कह णु कादव्वं ।। ६९ ।।

W 225) अद्धच्छि-पेच्छिअं मा करेसु साहाविअं पलोएसु ।
सो वि सुदिट्ठो क्खु भवे तुमं पि मुद्धा कलिज्जिहिसि ।। ७० ।।

W 452) कह सा सोभग्ग-गुणं मए समं वहइ सग्घिण तुमाए ।
जाए हरिज्जइ णामं हरिऊण वि दिज्जए मज्झ ।। ७१ ।।

वस्तुना वस्तुध्वनिः अनेन तद्गतचरितस्य प्रतीतेः ।। ६७ ।। **६८**) नायिका दूतीमुपालभते । **णीणिद्दं**–'निर्निद्रं दौर्बल्यं चिन्ता अलसत्वं सनिःश्वसितम् । मम मन्दभागिन्याः कृते सखि त्वामपि अहह परिभवति ।।' अत्र काचिन्नायिका सखीं प्रति, हे सखि, मन्दभागिन्या मम कृते प्रियमानेतुं गतागतानि कुर्वतीं त्वां निर्निद्रे-त्यादिना एते भावाः [[1]परिभवन्तीत्यनेन . . . इति तामुपालभत इत्यभिप्रायः] अत्र स्वतःसिद्धार्थशक्तिमूलो वस्तुना वस्तुध्वनिः, मन्दभागिन्या इति पदस्यार्थेन दूत्यास्तत्रासक्तिप्रतीतेः ।। ६८ ।। **६९**) नायिकोक्तिः । **उज्जुअ**– ऋजुरते न तुष्यति वक्रे ऽप्याशयं विकल्पयति । अत्राभव्यया मया प्रिये प्रियं कथं नु कर्तव्यम् ।। ' अत्र काचिन्नायिका सखीभिस्तव प्रेयानन्यत्रासक्तस्त्वया किमिति नावर्ज्यत इति पृष्टा ताः प्रति, ऋजुरत-इत्यादिना वाक्यकदम्बकेन तं कथमावर्जयामीति स्वविषादं प्रकटितवतीत्यभिप्रायः । अत्र वाक्यप्रकाश्यो ऽसंलक्ष्यक्रमो भावध्वनिः, विषादस्य प्रतीतेः ।।६९।। **७०**) काचिदसज्जरती प्रथमकुलटां बोधयति । **अद्धच्छि**– 'अर्धाक्षिप्रेक्षितं मा कुरुष्व स्वाभाविकमवलोकय । सो ऽपि सुदृष्टः खलु भवेत् त्वमपि मुग्धा करिष्यसे ।।' अत्र कंचिदपि सुरूपं युवानं इतरजनभयादर्धविलोकनेन साभिलाषं पश्यन्तीं नवकुलटां प्रति, काचिदसज्जरती शङ्कास्पदमर्धविलोकनं न कर्तव्यम् । स्वाभाविकमेव विलोकयेति तत्र फलं दर्शयित्वा तामेव कुर्वतीत्यभिप्राय । अत्र गूढकं नाम गुणीभूतव्यङ्ग्यं, प्रतीयमानस्योपदेशस्य व्याख्यायमानत्वात् ।।७०।। **७१**) काचित् कृतगोत्रस्खलितं नायकमुपालभते । **कह सा**–'कथं सा सौभाग्यगुणं मया समं वहति सघृण त्वया । यस्या हृदये ते नाम हृत्वा अपि दीयते मह्यम् ।।' **सग्घिण** इत्यत्र "से वा" [वा से] इति समासे विकल्पेन द्वित्वम् । अत्र

---

1 Added from Weber's extract,

W 482) उज्जागरअ-कसाइअ-गरुअच्छी मोह-मंडण-विलक्खा ।
लज्जइ लज्जालुइणी सा सुहअ सहीण वि वराई ॥ ७२ ॥

W 193) गोला-विसमोआर-च्छलेण अप्पा उरम्मि से मुक्को ।
अणुअंपा-णिद्दोसं तेण वि सा गाढमुवगूढा ॥ ७३ ॥

W 741) जइ वि हु दिल्लिंदिलिआ तह वि अ मा पुत्ति णग्गिआ भमसु ।
छेआ गाम-जुआणो माअं धूआएँ अणुमंति ॥ ७४ ॥

काचिन्नायिका अन्यकान्तासक्तेन नायकेन तन्नामग्रहमाकारिता तं प्रति, हे सघृण मयि दयापर, त्वया यस्या नाम हृत्वा मह्यं प्रति दीयते सा कथं मत्सदृशीति वक्रोक्त्या निर्घृण, तामेव सदा हृदये वहसि । पुरःस्थितामपि मां न जानासि । त्वां धिगिति तमुपालभत इत्यभिप्रायः । अत्र स्वतःसिद्धार्थशक्तिमूलो ऽसंकीर्णो वस्तुना वस्तुध्वनिः, सघृणपदप्रकाश्येन तदुपालम्भस्यानुगृहीतत्वात् ॥ ७१ ॥ **७२**) दूती नायकमाह । **उज्जागर–** 'उज्जागरकषायितगुर्वक्षी मोघमण्डनविलक्षा । लज्जते लज्जावती सा सुभग सखीनामपि वराकी ।' अत्र प्रथमं वासकसज्जिकायाः प्रिये चिरायति, पश्चाद्विरहोत्कण्ठिताया नायिकाया दूती नायकं प्रति, त्वया वञ्चिता समदुःखस्य सखीजनस्यापि सकाशाल्लज्जत इत्यनेन तत्कृतादपि नवान् महतः पराभवादितःपरं कां दशां प्राप्नुयात् । तत् त्वया सत्वरमागत्य संभावनीयेति तं प्रोत्साहितवतीत्यभिप्रायः । अत्र स्वतःसिद्धार्थशक्तिमूलवस्तुना वस्तुध्वनिः, अनेन नायिकायाः अनर्थागमरूपस्य वस्तुनः प्रतीतेः ॥ ७२ ॥ **७३**) काचिद् विदग्धा सखीमाह । **गोला विसम–** 'गोदाविषमावतारच्छलेनात्मा उरस्यसि [उरस्यस्य] मुक्तः । अनुकम्पानिर्दोषं केनापि सा गाढमुपगूढा ॥' अत्रैषा कामुकी तं विलोक्यानुरागातिशयाद् विषमावतारस्खलनव्याजेन तस्मिन्निपतति । एषोऽप्यनुकम्पया गृह्णन्निव तामालिङ्गतीत्यनेनैतौ युवानौ सर्वेषां पश्यतामेव परस्परमालिङ्गनमाचरतः । अनयोः कपटचरितं पश्येति काचित् कामप्याहेत्यभिप्रायः । अत्र स्वतःसिद्धार्थशक्तिमूलो ऽलंकारेण वस्तुनालंकारध्वनिः, अन्योन्यालंकारेण सर्वजनवञ्चनारूपस्य वस्तुनः प्रतीयमानत्वात् ॥ ७३ ॥ **७४**) काचिदसती यूनः श्रावयति । **जइ वि-** 'यद्यपि खलु बाला तथापि च मा पुत्रि नग्निका भ्रम । छेका ग्रामयुवानो मातरं दुहित्रानुमान्ति ॥' अत्र काचिदसती स्वदुहितरं प्रति, यद्यपि त्वं बाला तथापि विवसना मा भ्रम । विदग्धा ग्रामयुवानो दुहित्रा मातरमनुमान्तीति दुहितुर्यन्मदन–

W 333) मुह-विज्झविअ-पईवं णिरुद्ध-सासं[1] ससंकिउल्लावं ।
सवह-सअ-रक्खिओट्ठं चोरिअ-रमिअं सुहावेइ ॥ ७५ ॥

W 879) पंथअ ण एत्थ संथरमत्थि मणं पत्थरत्थले गामे ।
उण्णअ-पओहरे पेक्खिऊण जइ वससि ता वससु ॥ ७६ ॥

W 884) वंक-भणिआइ कत्तो कत्तो अद्धच्छि-पेच्छिअव्वाइ ।
ऊससिउं पि ण तीरइ छइल्ल[2]-बहुले हअग्गामे ॥ ७७ ॥

मन्दिरं तथैव मातुरपीति निश्चिन्वन्तीत्यनेन वा दूतीवृत्त्या स्वकीयस्य मदनमन्दिरस्य मनोहरतां व्यञ्जयन्ती तान् प्रोत्साहयतीत्यभिप्रायः । अत्र स्वतःसिद्धार्थशक्तिमूलो ऽलंकारेण वस्तुध्वनिः, अनुमानालंकारेण तत्प्रोत्साहनरूपस्य वस्तुनः प्रतीतेः ॥ ७४ ॥ **७५**) काचिदसतीमाह । **मुहविज्झविअ**- ' मुखनिर्वापितप्रदीपं निरुद्ध-निःश्वासशङ्कितोल्लासम् । सशपथशतरक्षितोष्ठं चोरितरतं सुखयति ।।' अत्र काचिदसती केनचित् प्रेषिता चोरितवर्णनेन त्वयापि तत्र प्रवर्तितव्यमिति सखीं प्रोत्साहयतीत्य-भिप्रायः । अत्र स्वतःसिद्धार्थशक्तिमूलो वस्तुना वस्तुध्वनिः । अनेन तत्प्रोत्साहनस्य प्रतीतेः ॥ ७५ ॥ **७६**) काचिदसती गृहमागतं पथिकमाह । **पंथअ ण**— ' पान्थ नात्र संस्तरमस्ति मनाक् प्रस्तरस्थले ग्रामे । उन्नतपयोधरान् दृष्ट्वा यदि वससि तस्माद् वस ॥ ' उन्नतपयोधरान् उन्नतमेघान् उन्नतस्तनौ च । अत्र काचिद-सच्चरिता विदग्धा हालिकवधूः सायंतनसमये गृहमागत्य शयनार्थं संस्तरं याचमानं कमप्यभिरूपपथिकं युवानं प्रति, साभिलाषापि निरभिलाषेव गृहजनवञ्चनार्थं प्रस्तरस्थले ग्रामे मनागपि संस्तरं नास्तीति प्रतिकूलं ब्रुवाणा उन्नतपयोधरौ दृष्ट्वा यदि वससि तस्माद् वसेत्यनेनोन्नतस्तनमण्डलं दृष्ट्वा यद्युपभोगापेक्षास्ति तर्हि तिष्ठेति निवासाय तं प्रोत्साहयतीत्यभिप्रायः । अत्र शब्दशक्तिमूलो वस्तुध्वनिः, अनेन तत्प्रोत्साहनस्य गम्यमानत्वात् । स्तनमण्डलं दृष्ट्वा रिरंसुश्चेत्तिष्ठे तिवस्तुनः प्रतीतेः ॥ ७६ ॥ **७७**) कस्याश्चिन्निर्वेदोक्तिः । **वंकभणिआइ**— ' वक्रभणितानि कुतः कुत अर्धाक्षिप्रेक्षितानि । उच्छ्वसितुमपि न शक्यते छेकबहुले हतग्रामे ॥' अत्र काचिदसती स्वैरभणितविलोकनचातुर्येण त्वया किमाकृष्यन्ते युवान इति पृष्टा तां प्रति, विदग्धबहुले इङ्गिताकारवेदिजनप्रचुरे ऽस्मिन् ग्रामे उच्छ्वसितुमपि न पार्यते । कुतो वक्रभणितानीत्यनेन स्वैरविहारसुखासंभवादुद्भूतं स्वनिर्वेदं प्रकटित-वतीत्यभिप्रायः । अत्र वाक्यप्रकाश्योऽसंलक्ष्यक्रमो भावध्वनिः, निर्वेदस्य प्रतीतेः ॥७७॥

---

1 M T णिरुद्धणीसा । 2 M T छउल्ल ।

W 885) **तत्थ वि होंति सहीओ पुत्तिएँ मा रुवसु जत्थ दिण्णा सि ।**
तत्थ वि णिउंज-लीला तत्थ वि गिरि-वाहिणी गोला ॥ ७८ ॥

W 132) **रूवं अच्छीसु ठिअं फंसो अंगेसु जंपिअं कण्णे ।**
हिअअं हिअएण समं विओइअं किं थ देव्वेण ॥ ७९ ॥

W 400) **भण को ण रूसइ जणो पत्थिज्जंतो अदेस-कालम्मि ।**
रइ-वावुडा रुअंतं पिअं पि पुत्तं सवइ माआ ॥ ८० ॥

W 742) **गअ-गंड-गवअ-सेरिह-सरभअ-सद्दूल-रिक्ख-जाईणं ।**
थणआ वाह-वहूए अभअं दाउं व णिक्कंता ॥ ८१ ॥

---

७८) काचिद् बालिकामाह । **तत्थ वि**-'तत्रापि भवन्ति सख्यः पुत्रिके मा रुदिहि यत्र दत्तासि । तत्रापि निकुञ्जलीलास्तत्रापि गिरिवाहिनी गोदा ॥ ' अत्र काचिद् विदग्धा सखी सखीभिः समं गोदावरीतीरनिकुञ्जेषु स्वैरविहारलीलां स्मृत्वा श्वशुरग्रामगमनमनिच्छन्तीं बालां प्रति, त्वं यत्र दत्तासि तत्र सख्यादयः सन्ति, मा रुदिहीत्यनेन तत्रापि तव स्वैरसुखं संपत्स्यते, गच्छेति प्रोत्साहितवतीत्यभिप्रायः । अत्र स्वतःसिद्धार्थशक्तिमूलो वस्तुना वस्तुध्वनिः, अनेनाश्वासनेन तत्रापि चौर्यरतक्रीडाः संभविष्यन्तीति वस्तुनः प्रतीतेः ॥ ७८ ॥ ७९) नायिकावाक्यम् । **रूवं अच्छीसु**– ' रूपमक्ष्णोः स्थितं स्पर्शोऽङ्गेषु जल्पितं कर्णे । हृदयं हृदयेन समं (सह स्थितं) वियोजितं किमत्र दैवेन ॥' **किं थ** इत्यत्र " लुगव्ययत्यदाद्यात्तदचः " इत्यदाद्यात्परस्याव्ययस्यादेरचो लुक् । अत्र काचित् प्रोषितभर्तृका विरहव्यथातिशयादष्टमावस्थां प्राप्ता निरन्तरचिन्तासमानीतदयितरूपादिकमुपालभमाना दैवेन किमत्र वियोजितं सर्वमुपस्थितमित्यनेन कथं मम हृदयमङ्गानि तप्यन्त इति सविस्मयं सखीमाहेत्यभिप्रायः । अत्र वाक्यप्रकाश्योऽसंलक्ष्यक्रमो रसध्वनिः, संतापकारिणः प्रवासविप्रलम्भस्य प्रतीतेः ॥ ७९ ॥ ८०) दूती जारमाह । **भण को**– ' भण को न रुष्यति जनः प्रार्थ्यमानः अदेशकाले । रतिव्यापृता रुदन्तं प्रियमपि पुत्रं शपति माता ॥ ' अत्र काचिदसतीमनवसरे रतिं प्रार्थ्य तन्निरासाद्विमनायमान—मुपपतिं प्रति, दूती, अनवसरे याचमानाय को वा न रुष्यति । तथाहि । माता रतिकाले प्रियमपि पुत्रं रुदन्तं शपतीत्यनेन त्वत्कृत एवायं दोषः, न तन्निमित्तक इति तं प्रोत्साहयतीत्यभिप्रायः । अत्र स्वतःसिद्धार्थशक्तिमूलोऽलंकारेण वस्तुध्वनिः, निदर्शनालंकारेण रतिप्रार्थनाभङ्गविमनस्कजारप्रोत्साहनस्य गम्यमानत्वात् ॥ ८० ॥ ८१) काचित् सखीमाह । **गअगंड**– ' गजगण्डगवयसैरिभशरभकशार्दूलऋक्ष

W 649) **परिपुच्छिआ ण जंपइ गहिआ विप्फुरइ चुंबिआ रुअइ ।**
तुण्हिक्का णव-वहुआ किआवराहेण दइएण ॥ ८२ ॥

W 951) **वाणिअअ हत्थि-दंता कत्तो अम्हाण वग्घ-किच्ची अ ।**
जाव लुलिआलअ-मुही घरम्मि परिवट्टए सुण्हा ॥ ८३ ॥

W 470) **अण्णाण वि होंति मुहे पम्हल-धवलाइ दीह-कसणाइ ।**
णअणाइ सुंदरीणं[1] तह परिदट्ठुं ण-आणंति ॥ ८४ ॥

जातीनाम् । स्तनौ व्याधवध्वा अभयं दातुमिव निष्क्रान्तौ ॥' अत्र काचिद् विदग्धा कस्याश्चिद् व्याधवध्वा निरवद्यमुदितावतिमनोहरौ कुचकलशौ दृष्ट्वा सखीं प्रति, अस्याः स्तनौ गजादीनामभयं दातुमिव निष्क्रान्तावित्यनेनास्या ईदृग्विधौ स्तनौ दृष्ट्वा सर्वेऽपि पक्कणवासिनः शबरयुवानो विरहव्यथाकर्शिता मृगयां कर्तुमशक्तास्तदेकनिरतास्तिष्ठन्तीति ज्ञापितवतीत्यभिप्रायः । अत्र कविनिबद्धवक्तृप्रौढोक्तिसिद्धार्थशक्तिमूलो ऽलंकारेण वस्तुध्वनिः, उत्प्रेक्षया व्याधयुवानस्तत्परतया मृगयायामशक्ता, इति वस्तुनः प्रतीतेः ॥ ८१ ॥ ८२) काचित् सखीमाह । **परिपुच्छिआ–** ' परिपृष्टा न जल्पति गृहीता विस्फुरति चुम्बिता रोदिति । तूष्णीका नववधूः कृतापराधेन दयितेन ॥ ' **तुण्हिक्का** इत्यत्र दैवादिपाठाद् द्वित्वम् । अत्रैषा कृतापराधे प्रिये गृहमागते सति मानवशेन तूष्णीका दर्शनस्पर्शनसंभाषणादिरहिता तेन परिपृष्टा न जल्पतीत्यादिनान्तःसंतप्यमानाया बालिकाया रोषविशेषं पश्यंति काचित् सखीमाहेत्यभिप्रायः । अत्र वाक्यप्रकाश्यो ऽसंलक्ष्यक्रमो भावध्वनिः, ईर्ष्यामानस्य प्रतीतेः ॥ ८२ ॥ ८३) काचिद् वणिजमाह । **वाणिअअ–** 'वाणिजक हस्तिदन्ताः कुतो ऽस्माकं व्याघ्रकृत्तयश्च । यावल्लुलितालकमुखी गृहे परिवर्तते स्नुषा ॥' ' **किच्चि** ' इत्यत्र " चः कृत्तिचत्वरे " इति [संयुक्तस्य] चः । अत्र काचिद् व्याधजरती गजदन्तान व्याघ्रकृत्तीश्च क्रेतुमागतं वणिजं प्रति, एषा स्नुषा लुलितालकमुखी यावद् गृहे वर्तते तावदस्माकं गजदन्तव्याघ्रकृत्तयश्च कुत इत्यनेनास्याः पतिरनुरागातिशयान्नवयौवनामेनां विहाय क्षणमपि अन्यत्र स्थातुमशक्तः सन् मृगयां न करोतीत्यभिप्रायः । अत्र स्वतःसिद्धार्थशक्तिमूलो ऽलंकारेण वस्तुध्वनिः, उत्तरालंकारेण तत्पतिस्तदासक्ततया मृगयां न करोतीत्यस्य वस्तुनः प्रतीतेः ॥ ८३ ॥ ८४) काचित् सहचरमाह । **अण्णाण वि–** ' अन्यासामपि भवति मुखे पक्ष्मलधवलानि दीर्घकृष्णानि । नयनानि सुन्दरीणां

---

1 M T सुंदरीए ।

W 877) महुएहि किं व पंथअ जइ हरसि णिअंसणं णिअंबाओ ।
साहेमि कस्स रण्णे दूरे गामो अहं एक्का ॥ ८५ ॥

W 957) णिअ-दइअ-दंसणूसुअ पंथअ अण्णेण वच्चसु पहेण ।
गहवइ-धूआ दुल्लंघ-वाउरा ठाइ हअ-गामे ॥ ८६ ॥

W 860) साहेंती सहि सुहअं खणे खणे दूमिआ सि मज्झ कए ।
सब्भाव-णेह-करणिज्ज-सरिसअं दाव विरइअं तुमए ॥८७॥

तथा परिद्रष्टुं न जानन्ति ॥' अत्र कश्चित् प्रियया भावगम्भीरैरवलोकनैरपहृतमनाः सहचरस्य पुरस्तादनुरागातिशयात्तानि स्मारं स्मारं प्रशंसतीत्यभिप्रायः । अत्र पदप्रकाश्यो ऽसंलक्ष्यक्रमो भावध्वनिः, तथेति पदेन पूर्वानुभूतेन प्रियावलोकनेन विश्लेषस्मरणस्य प्रतीयमानत्वात् ॥ ८४ ॥ ८५) कस्याश्चिदसत्या वचनम् । **महुएहि**– ' मधूकैः किं पान्थ यदि हरसि निवसनं नितम्बात् । कथयामि कस्यारण्ये दूरे ग्रामो ऽहमेका ॥' **महुएहि** इत्यत्र " वा मधूके " इत्यूकारस्योकारः । **णिअंसण**–शब्दो वस्तु [वसन] वाची देश्यः । काचिदसती युवतिर्वनान्तरमुपागत्य मधूककुसुमानि संगृह्य प्रतिनिवर्तमाना मध्येमार्गं कस्मिंश्चिदभिरूपे यूनि पथिके तान्यादातुं करं प्रसारयति सति तं प्रति, हे पान्थ, मधूकैः किं वा । नितम्बादंशुकं यदि हरसि तदारण्ये कस्य कथयामि । ग्रामो दूरे, अहमेकेत्यनेन तद्दर्शनादुत्पन्नमन्मथव्यथापदेशादुपभोगाय वासो हरेति तं प्रति बोधितवतीत्यभिप्रायः । अत्र स्वतःसिद्धार्थशक्तिमूलो विधिनिषेधरूपेण वस्तुना विधिरूपो वस्तुध्वनिः, अनेन संभोगार्थं वस्त्रमपहरेति प्रतीतेः ॥ ८५ ॥ ८६) कस्याश्चिदसत्या वचनम् । **णिअदइअ**– ' निजदयितादर्शनोत्सुक पान्थ अन्येन व्रज पथा । गृहपतिदुहितातिदुर्लङ्घ्यवागुरा तिष्ठतीह हतग्रामे ॥' अत्र काचिदसजरती कमप्यभिरूपं पथिकयुवानं दृष्ट्वा तं प्रति, हे पान्थ, निजदयितादर्शनोत्सुक, अन्येन पथा व्रज । अस्मिन् हतग्रामे दुर्लङ्घ्यवागुरा गृहपतिसुता तिष्ठतीत्यनेनात्र काचिद् रमणीयाकृतिर्युवतिरास्ते । सा त्वया द्रष्टव्येति तं प्रोत्साहितवतीत्यभिप्रायः । अत्र स्वतःसिद्धार्थशक्तिमूलो विधिनिषेधरूपेण वस्तुना विधिरूपो वस्तुध्वनिः । अनेनावश्यमेषा द्रष्टव्येति विधेः प्रतीतेः ॥ ८६ ॥ ८७) नायिकोक्तिः । **साहेंती**– ' साधयन्ती सखि सुभगं क्षणे क्षणे दूनासि मम कृते । सद्भावस्नेहकरणी[1] यत्सदृशं तावद् विरचितं त्वया ॥ ' अत्र काचिन्नायिका

---

1 T कारिणी ।

W 958) आसाइअमण्णाएण जेत्तिअं ता तीएँ ण बंध धिइं ।
ओरमसु उसह एण्हिं रक्खिज्जइ-गहवइक्खेत्तं ॥ ८८ ॥

W 959) उच्चिणसु पडिअ-कुसुमं मा धुण सेहालिअं हलिअ-सुण्हे ।
एस अवसाण-विरसो ससुरेण सुओ[1] वलअ-सद्दो ॥ ८९ ॥

W 159) ईसालुओ पई से रत्तिं महुए ण देइ उच्चेउं ।
उच्चेइ अप्पण च्चिअ माए अइउज्जुअ-सहाओ ॥ ९० ॥

संभोगखिन्नां सखीं प्रति, सद्भावेत्यादिविपरीतलक्षणया मत्प्रियं रमयन्त्या त्वया शत्रुत्वमाचरितमित्यनेन लक्षितार्थेन तस्याः सापराधित्वं प्रकाशितवतीत्यभिप्रायः । अत्र लक्षणामूलो वाक्यगतात्यन्ततिरस्कृताविवक्षितवाच्यो ध्वनिः, अनेन लक्ष्यार्थेन सख्याः सापराधत्वप्रकाशनप्रतीतेः ॥ ८७ ॥ ८८) कस्याश्चित् सख्या वचनम् । **आसाइअं–** 'आसादितमन्यायेन यावत्तावता बधान धृतिम् । उपरम वृषभेदानीं रक्ष्यते गृहपतिक्षेत्रम् ॥ ' अत्र क्षेत्रशब्देन पत्नी व्यज्यते । अत्र काचिद् विदग्धा सखी कमपि जारं कस्याश्चिदसत्या गृहं प्रवेश्य परिपालयन्ती तदनु तदीये कस्मिंश्चित्समागच्छति सति आसादितमित्यादिना वृषभनिवारणपरेण वाक्यकदम्बकेन तदासक्त्या चिरयन्तमुपपतिमुपभोगान्निवारयतीत्यभिप्रायः । अत्र स्वतःसिद्धार्थशक्तिमूलो निषेधरूपेण वस्तुना निषेधरूपो वस्तुध्वनिः, वृषभनिवारणेन तन्निवारणस्य प्रतीतेः ॥ ८८ ॥ ८९) कस्याश्चिद् वचनम् । **उच्चिणसु–** 'उच्चिनु पतितकुसुमं मा धुनु शेफालिकां हालिकस्नुषे । एषोऽवसानविरसो श्वशुरेण श्रुतो वलयशब्दः ॥' अत्र काचिच्चतुरा सखी गृहपश्चाद्भागस्थितेषु शेफालिकानिकुञ्जेषु उपपतिना सह रममाणां सखीं पालयन्तीं रभसजनितं तदीयवलयशिञ्जितमाकर्ण्य तां प्रति, उच्चिनु पतितकुसुममित्यादिना वाक्यकदम्बकेन चौर्यरते प्रसक्ते वलयशब्दो न कर्तव्य इति निवारितवतीत्यभिप्रायः । अत्र स्वतःसिद्धार्थशक्तिमूलो विधिनिषेधरूपेण वस्तुना निषेधरूपो वस्तुध्वनिः, उच्चिनु, मा धुन्विति विधिनिषेधाभ्यां वलयशब्दो न कर्तव्य इति निषेधस्य प्रतीतेः ॥ ८९ ॥ ९०) कस्याश्चिद् वचनम् । **ईसालुओ–** ईर्ष्यावान् पतिरस्याः रात्रौ मधूकानि न ददात्यवचेतुम् । उपचिनोत्यात्मनैव मातः अतिऋजुस्वभावः ॥ ' **अप्पण** इति स्वयमर्थे निपातितः । " स्वयमप्पणा " इत्युक्तत्वात् । अत्र काचिद् विदग्धा विदितप्रातिवेशिनीवृत्तान्ता सखीं प्रति, अस्याः पतिरीर्ष्यावान् रात्रौ मधूकान्यवचेतुं न

---

1 M T सुदो ।

W 469) गामणि-घरम्मि अत्ता एक्क च्चिअ पाडला इहग्गामे ।
बहु-पाडलं व सीसं दिअरस्स ण सुंदरं एअं ॥ ९१ ॥
W 550) बोल-सुणओ विवण्णो अत्ता मत्ता पई वि अण्णत्तो ।
फलिई वि मोडिआ महिसएण को कस्स[1] काहेइ ॥ ९२ ॥
W 960) पविसंती घर-दारं विवलिअ-वअणा विलोइऊण पहं ।
खंधे मोत्तूण घडं हा हा णट्ठो त्ति रुअसि सहि किं ति ॥९३॥

ददाति । अतिऋजुस्वभावः स्वयमेवावचिनोतीत्यनेन स्वगृहिण्या वनव्यभिचारशङ्कया तां परिहृत्यैष स्वयं गच्छति । गृहे व्यभिचारं न जानाति, पश्येति सोपहासमाहेत्यभिप्रायः । अत्र स्वतःसिद्धार्थशक्तिमूलो वस्तुना संसृष्टो वस्तुध्वनिः, ईर्ष्यावान् मधूकान्यवचेतुं न ददातीति वाक्यप्रकाश्यस्यातिऋजुस्वभावः स्वयमवचिनोतीति वाक्यप्रकाश्येन सह संसर्गात् ॥ ९० ॥ ९१) श्वश्रूं प्रति कस्याश्चिद् वचनम् । **गामणि–** ' ग्रामणीगृहे अत्ता एकैव पाटला इह ग्रामे । बहुपाटलमिव शीर्षं देवरस्य न सुन्दरमेतत् ॥ ' अत्र ग्रामणीत्यनेन तस्य प्रतीकारसामर्थ्यं गम्यते । बहुपाटलशीर्षमित्यनेन देवरस्य तद्गृहिणीसंबन्धो गम्यते । न सुन्दरं, न शोभनम् । अनर्थपर्यवसायीत्यर्थः । अत्र काचिदसती देवरानुरक्ता इह ग्रामे ग्रामणीगृहे एकैव पाटलेत्यादिना वाक्यकदम्बकेन ग्रामणीगृहप्रवेशे महान्तमनर्थं प्रदर्श्य तेन स्वाभिलषितसिद्धये तस्मादेनं निवारयेति श्वश्रूमाहेत्यभिप्रायः । अत्र स्वतःसिद्धार्थशक्तिमूलो वस्तुना संकीर्णो वस्तुध्वनिः, ग्रामण्यादिपदव्यङ्ग्यः स्वार्थसिद्धये तन्निवारणरूपस्य व्यङ्ग्यस्यानुग्राह्यत्वात् ॥ ९१ ॥ ९२) कस्याश्चिदसत्या वचनम् । **बोल–**'बोलो (दुष्टः छिन्नकर्णो वा सचासौ) शुनकश्च विपन्नः अत्ता मत्ता पतिरप्यन्यतः । कार्पासो ऽपि मा भूदितो महिषकेण कस्तस्य कथयति ' । अत्र काचिदसती हालिकवधूः, शुनको विपन्नः, मत्ता माता, पतिरन्यतः, तस्मात् कार्पासो ऽपि महिषेण भग्नः । कस्तस्य कथयतीत्यनेन प्रतिबन्धकानां दुष्टशुनकादीनामभावं सूचयन्ती वातदूतीवृत्त्या प्रवेशकालोऽयं, त्वया समागन्तव्यमिति विधेः प्रतीतेः ॥ ९२ ॥ ९३) कस्याश्चिद् विदग्धाया वचनम् । **पविसंती–** ' प्रविशन्ती गृहद्वारं विवलितवदना विलोक्य पन्थानम् । स्कन्धे मुक्त्वा घटं हा हा नष्ट इति रोदिषि सखि किमिति ॥ ' अत्र काचिद् विदग्धा प्रातिवेशिकीं कांचित् स्नुषां प्रति, हे सखि, गृहद्वारं प्रविशन्ती विवलितवदना पन्थानं विलोक्य स्कन्धे स्थितं घटं मुक्त्वा हा हा नष्ट इति किं रोदिषीत्यनेन

1 M T दस्स ।

W 961) मा पंथ रुंधसु पहं अवेहि बालअ असेसिअ-हिरीअ ।
अम्हे अविरिक्काओ[1] सुण्णं घरअं व अक्कमसि ॥ ९४ ॥

W 32) अह संभाविअ-मग्गो सुहअ तुए च्चेअ णवर णिव्वूढो ।
एण्हिं हिअए अण्णं अण्णं वाआइ लोअस्स ॥ ९५ ॥

W 889) माए घरोवअरणं अज्ज खु णत्थि त्ति साहिअं तुमए ।
ता भण किं करणिज्जं एमेअ ण वासरो ठाइ ॥ ९६ ॥

नदीतीरलतागृहे कृतसंकेतवेलामतिवाह्येदानीं पथि गच्छन्तं जारं दृष्ट्वा जलाहरण-कर्मणि समाप्ते ऽपि पुनर्गमनसिद्धये स्वयमेव घटं पातयित्वा किमिति वृथा रोदिषि । शीघ्रमेव पुनरपरं घटं गृहीत्वा गच्छेत्यनुमतवतीत्यभिप्रायः । अत्र स्वतःसिद्धार्थ-शक्तिमूलो ऽलंकारेण वस्तुध्वनिः, घटपातनेन पुनः संकेतस्थानगमनेच्छाप्रतीतेः ॥ ९३ ॥ ९४) कस्याश्चिदसत्या वचनम् । **मा पंथ**— 'मा पान्थ रुन्धि पन्थानं अपेहि बालक अशेषितह्रीक । वयमरिक्ताः (किं) शून्यं गृह-मिवाक्रमसि ॥ ' इत्यनेन कामान्धतया पथिकजनसमक्षं गृहीतकामं जारं निवारयन्ती उपमानकथनव्याजेन संकेतस्थानं शून्यगृहमस्ति चेत्तत्र गच्छाव इति तं प्रबोधित-वतीत्यभिप्रायः । अत्र स्वतःसिद्धार्थशक्तिमूलो ऽलंकारेण वस्तुध्वनिः, उपमानेन शून्यगृहगमनप्रतीतेः ॥ ९४ ॥ ९५) नायिकावचनम् । **अह**– 'असौ सद्भावित-मार्गः सुभग त्वयैव केवलं निर्व्यूढः । इदानीं हृदये ऽन्यदन्यद्वाचि लोकस्य ॥ ' अत्र काचित् प्रगल्भा नायिका गोत्रस्खलितं नायकं प्रति, लोकस्य मनस्यन्यद् वाच्य-न्यत् । तव तु यन्मनसि वर्तते तदेव वाचि । तस्मात् त्वया सद्भावितमार्गः केवलं निर्व्यूढ इत्यनेन तं प्रशंसन्तीव विपरीतलक्षणया न केवलं तद्गृहगमनमेव, तन्नामधेयग्रहणमपि मम पुरस्तात् करोषि । तस्मात् त्वादृशो दुरात्मा कश्चिन्नास्तीति तमुपालभत इत्यभिप्रायः । अत्र लक्षणामूलो वाक्यगतात्यन्ततिरस्कृताविवक्षितवाच्यो ध्वनिः, अनेन दुरात्मेत्युपालम्भस्य प्रतीतेः ॥ ९५ ॥ ९६) कस्याश्चित् स्वैरिण्या वचनम् । **माए**— 'मातर्गृहोपकरणं अद्य खलु नास्तीति कथितं त्वया । तस्माद् भण किं करणीयं एवमेव न वासरस्तिष्ठति ॥ ' **'एमेअ'**— इत्यत्र " एवमेव देवकुलप्रावार-कयावज्जीवितावटावर्तमान तावति वः"[इत्यादिना] अन्तर्वर्तिनो वकारस्य [अचा सहि-तस्य] लोपः । अत्र काचिदसती मातरमद्य गृहोपकरणं नास्तीत्येवमादिना वाक्येन स्वैर-विहारार्थिनीयं कंचनाभिसर्तुकामा गृहोपकरणव्याजेन मातरं पृच्छतीत्यभिप्रायः । अत्र

---

1 M T अहे अ ण रुक्काओ ।

W 4) उव णिच्चल-णिप्फंदा भिसिणीवत्तम्मि रेहइ बलाआ।
णिम्मल-मरगअ-भाअण-परिट्ठिआ संख-सिप्पि व्व ॥ ९७ ॥
W 875) णोल्लेइ अणोल्ल-मणा अत्ता मं घर-भरम्मि सअलम्मि।
खण-मेत्तं जइ संझाएँ होइ ण व होइ वीसामो ॥ ९८ ॥
W 962) सुव्वइ समागमिस्सइ तुज्झ पिओ अज्ज पहर-मेत्तेण।
एमेअ किं ति चिट्ठसि ता सहि सज्जेसु करणिज्जं ॥ ९९ ॥
W 705) गामेलुअ म्हि गामे वसामि[1] णअरट्ठिइं ण-आणामि।
णाअरिआणं पइणो हरेमि जा होमि सा होमि ॥१००॥

स्वतःसिद्धार्थशक्तिमूलो वस्तुना वस्तुध्वनिः,स्वैरविहारस्य गम्यमानत्वात् ॥९६॥ ९७) कस्याश्चिदसत्या वचनम्। **उव**–'पश्य निश्चलनिष्पन्दा बिसिनीपत्रे राजते बलाका। निर्मलमरकतभाजनप्रतिष्ठिता शङ्खशुक्तिरिव॥' राजते पश्येति कथनव्याजेन बलाकानिष्पन्दतया जनरहितो ऽयं देशस्तेनायं संकेतस्थानं भवितुमर्हति इति तटस्थं जारं श्रावयतीत्यभिप्रायः। अत्रोपमालंकारः। स्वतःसिद्धार्थशक्तिमूलो वस्तुना वस्तुध्वनिः, बलाकानिष्पन्दताव्यङ्ग्येन जनराहित्येन संकेतस्थानस्य गम्यमानत्वात् ॥ ९७ ॥ ९८) कस्याश्चिदसच्चरिताया वचनम्। **णोल्लेइ**– 'प्रेरयत्यनार्द्रमना अत्ता मां गृहभरे सकले। क्षणमात्रं यथा संध्यायां भवति न वा भवति विश्रामः॥' अत्र कस्याश्चित् स्नुषा प्रातिवेशिनीम् अनार्द्रमनाः श्वश्रूरित्यादिना वाक्यकथनव्याजेन मम दिवा रात्रौ च नावसरः। क्षणमात्रं संध्यायां विश्रमो ऽस्ति। तदानीं त्वया समागन्तव्यमित्यवसरापेक्षिणं तटस्थं जारं श्रावयतीत्यभिप्रायः। अत्र स्वतःसिद्धार्थशक्तिमूलो ऽलंकारेण वस्तुना वस्तुध्वनिः, अनेन संध्यासमये त्वया समागन्तव्यमिति वस्तुनः प्रतीतेः ॥ ९८ ॥ ९९) कस्याश्चित् सख्या वचनम्। **सुव्वइ**–'श्रूयते समागमिष्यति तव प्रियो ऽद्य प्रहरमात्रेण। एवमेव किमिति तिष्ठसि तस्मात् सखि सज्जय करणीयम्॥' अत्र काचित् सखी प्रातिवेशिकीं स्वैरिणीं कस्याश्चित् स्नुषां प्रति, श्वश्र्वाः संनिधौ हे सखि, प्रियो ऽद्य प्रहरमात्रेण समागमिष्यतीति श्रूयते। तस्मात् करणीयं सज्जय। एवमेव किमिति तिष्ठसीत्यनेन प्रियागमनस्य याममात्रं विलम्बो ऽस्ति। एतावति काले शाकाद्यानयनव्याजेन निर्गत्य संकेतागतमुपपतिमुपभोगेन कृतार्थयेत्यावेदयतीत्यभिप्रायः। अत्र स्वतःसिद्धार्थशक्तिमूलो वस्तुना वस्तुध्वनिः, अनेनास्मिन्नन्तरे व्याजान्निर्गत्य तदुपभोगः क्रियतामिति वस्तुनः प्रतीतेः ॥ ९९ ॥ १००) कस्याश्चिद् वचनम्। **गामेलुअ म्हि**–'ग्रामीणाहं ग्रामे

1 MT गामेरुहह्मि।

W 963) खण-पाहुणिआ देअर-जाआ ए सुहअ किं ति दे भणिआ ।
रुअइ घरोपंत-फलिणि-घरम्मि अणुणिज्जउ वराई ॥ १०१ ॥
W 940) ताण गुणग्गहणाणं ताणुक्कंठाण तस्स पेम्मस्स ।
ताण भणिआण सुंदर असरिसओ होइ ओसाओ ॥१०२॥
W 103) बहु-पुप्फ-भरावणमिअ-भूमि-गअ-साह सुणसु विण्णत्तिं[1] ।
गोला-तड-विअड-कुडुंग महुअ सणिअं गलिज्जासु ॥१०३॥

वसामि नगरस्थितिं न जानामि । नागरिकाणां पतीन् हरामि या भवामि सा भवामि ॥ ' **अम्हि**– इत्यत्र " तद्व्यत्ययश्च " इति लुङ्स्थाने लट् । अत्र काचित् ग्रामीणा नायिका सखीं प्रति, ग्रामे जाता ग्रामे वसामि नगरस्थितिं न जानामि । या भवामि सा भवामि, तथापि नागरिकाणां पतीन् हरामीत्यनेन तया सह संलापव्याजात् स्वस्य रूपयौवनकलाकौशलानि नवागतं कमपि नागरिकं वातदूतीवृत्त्या श्रावयतीत्यभिप्रायः । अत्र स्वतःसिद्धार्थशक्तिमूलो ऽलंकारेण वस्तुध्वनिः, विभावनया वस्तुनः प्रतीतेः । " प्रसिद्धहेतुव्यावृत्त्या यत्किंचित् कारणान्तरम् । नैसर्गिकं वा यत्र स्यात् विभाव्या सा विभावना ॥ " इति ॥१००॥ **१०१**) कस्याश्चित् प्रजावत्या वचनम् । **खणपाहुणिआ**–' क्षणप्राहुणिका देवर जाया सुभग किमपि भणिता । रोदिषि गृहपश्चाद्भागफलिनीलताकुञ्जे वराकी ' अत्र काचित् प्रजावती देवरं प्रति, हे सुभग, तव जाया क्षणप्राहुणिका सा किमपि भणिता गृहपश्चाद्भागफलिनी लताकुञ्जे रोदिति वराकी । अनुनीयतामित्यनेनेयं त्वय्यनुरक्ता सती ग्रामान्तरादुत्सवव्याजेनागता भवन्तमदृष्ट्वा लतागृहे भृशमुत्कण्ठिता तिष्ठति । तामुपभोगेन संभावयेत्यभिप्रायः । अत्र स्वतःसिद्धार्थशक्तिमूलो वस्तुना वस्तुध्वनिः, अनेन तदुपभोगः क्रियतामिति वस्तुनः प्रतीतेः ॥१०१॥ **१०२**) कस्याश्चिद् वचनम् । **ताण**– ' तेषां गुणग्रहणानां तासामुत्कण्ठानां तस्य प्रेम्णः । तेषां भणितानां सुन्दर असदृशको भवत्यवसादः ॥ ' अत्र तत्पदैस्तत्तदतिशयो गम्यते । अत्र काचिदुपारूढयौवनमदा कामिनी बहुविधसुरततन्त्रसमर्थोऽहमिति विकत्थमानं अन्तरा श्रान्तं कान्तं प्रति, हे सुन्दर, तेषां गुणग्रहणादीनामसदृशो ऽवसादो भवतीत्यनेन तमपहसन्ती स्वयं पुरुषायितायोत्सहत इत्यभिप्रायः । अत्र स्वतःसिद्धार्थशक्तिमूलो वस्तुना वस्तुध्वनिः, अनेन पुरुषायितकरणेच्छाप्रतीतेः ॥१०२॥ **१०३**) कस्याश्चित् स्वैरिण्या वचनम् । **बहुपुप्फ**- ' बहुपुष्पभारावनमित भूमिगतशाख शृणु विज्ञाप्यम् । गोदातटविकटकुडुंग मधूक

---

1 M T विण्णप्पं ।

W 965)   **घरिणि-पवेसिअ-जारे घरे घरत्थेण छिंछई ठविआ ।**
मिलिआ छिंछइ-जारा पच्छा घरिणी-घरत्थो अ ॥१०४॥

शनैर्गलिष्यसि ॥ ' अत्र काचिदसती बहुपुष्पभरावनमितभूमिगतशाखे गोदातट-विकटकुडङ्गमधूके कृतसंकेता तत्रोपपतिना रममाणा कदाचिदस्य विरलपुष्पतां दृष्ट्वा हे मधूक, शनैर्गलिष्यसि, इत्यनेनेतःपरमपि कानिचिद्दिनानि तेन समं रिरंसुः कुसुमापनयनव्यपदेशेन स्वनिर्गमनसिद्धये तं प्रार्थयत इत्यभिप्रायः । अत्र स्वतः-सिद्धार्थशक्तिमूलो वस्तुना वस्तुध्वनिः, अनेन रिरंसोस्तस्या निर्गमनेच्छा-प्रतीतेः ॥ १०३ ॥ **१०४**) कवेर्वाक्यम् । **घरिणि--** ' गृहिणीप्रवेशितजारे गृहे गृहस्थेन असती स्थापिता । मिलितावसतीजारौ पश्चाद् गृहिणी गृहस्थश्च ॥ ' अत्र वाक्यार्थः स्पष्टः । अभिप्रायो व्यक्त एव ॥ १०४ ॥

इति वेदकोमटिवेमभूपालेन कृता
सप्तशतीसारटीका भावदीपिका संपूर्णा ॥

INDEX OF GĀTHĀS

	गाथाक्रमाङ्कः
अइपिहुलं जलकुम्भं	६६
अच्छउ ताव मणहरं	२७
अज्ज च्चेअ पउत्थो	२१
अज्ज मए गंतव्वं	३५
अणुदिअहकआभोआ	४१
अण्णमहिलापसंगं	१८
अण्णाण वि होंति	८४
अत्ता एत्थ णुमज्जइ	१५
अद्धच्छिपेच्छिअं मा	७०
अमिअं पाअडकव्वं	२
अवरज्झसु वीसद्धं	५०
अवलंबिअमाण–	३०
अव्वो ण आमि	१४
असमत्तमंडण च्चिअ	२३
अह अम्ह आगओ	४९
अहअं लज्जालुइणी	१६
अह संभाविअमग्गो	९५
आणासआइ देंती	१०
आरंभंतस्स धुरं	२६
आसाइअमण्णाएण	८८
ईसालुओ पई से	९०
उच्चिणसु पडिअ-कुसुमं	८९
उज्जागरअकसाइअ	७२
उज्जुअरए ण तूसइ	६९
उण्हं विणीससंतो	३६

	गाथाक्रमाङ्कः
उद्धच्छो पिअइ जलं	१३
उव णिच्चलणिप्फंदा	९७
एद्दहमेत्तग्गामे	५४
ओसरइ धुणइ	६३
कइअवरहिअं पेम्मं	५२
कत्तो खेमं कत्तो	६४
कस्स व ण होइ	७
कह सा सोभग्गगुणं	७१
केसा पंडुरछाआ	६७
खणपाहुणिआ देअरजाआ	१०१
खाणेण अ पाणेण	३७
गअगंडगवअसेरिह–	८१
गामणिघरम्मि अत्ता	९१
गामेलुअ म्हि गामे	१००
गाहाण अ गेहाण	३
गोलाविसमोआर	७३
घरिणि-पवेसिअजारे	१०४
जइ वि हु दाह्लिं–	७४
जं असरणो व्व	१७
जं जं सो णिज्झाअइ	२५
जं तुह कज्जं तं	८
जाइ वअणाइ अम्हे	३२
ठाणे ठाणे वलिआ	२९
णिअदइअदंसणूसुअ	८६
णीणिइं दोव्वल्लं	६८

	गाथाक्रमाङ्कः		गाथाक्रमाङ्कः
णिद्दं लहंति भणिअं	२४	भम धम्मिअ वीसद्धं	५८
णूमंति जे पहुत्तं	३४	भंजंतस्स वि तुह	४२
णोल्लेइ अणोल्लमणा	९८	भंडंतीएँ तिणाइं	६५
तइआ मह गंडत्थल-	३९	भिउडीए पुलोइस्सं	६२
तत्थ वि होंति सहीओ	७८	महिलासहस्सभरिए	३८
तस्स अ सोहग्गगुणं	५७	महुएहि किं व	८५
तह सुण्हाएँ पुलइओ	४८	माए घरोवअरणं	९६
ताण गुणग्गहणाणं	१०२	मा पंथ रुंधसु पहं	९४
तुह दंसणसत्तिण्हा	३१	मा वच्चसु वीसंभं	६१
थोअं पि ण णीइ	२२	मुहविज्झविअपईवं	७५
दक्खिण्णएण एंतो	५३	रणरणअसुण्णहिअओ	५१
दुक्खं देंतो वि	४६	रूवं अच्छीसु	७९
धणिअं उवगूहिअ	४०	वण्णंतीहि तुह गुणे	३३
पइपुरओ च्चिअ	५९	वंकभणिआइ कत्तो	७७
पच्चक्खमंतुकारअ	५६	वंकं को पुलइज्जइ	४३
पच्चूसागअ णव--	११	वडजक्खो जो अ	४५
पणमह माणस्स	४	वाणिअअ हत्थिदंता	८३
परिपुच्छिआ ण जंपइ	८२	वाणीरकुडंगुड्डीण-	१९
पविसंती घरदारं	९३	वाहित्ता पडिवअणं	१२
पसुवइणो रोसारुण--	१	सच्चं कलहे कलहे	५
पंथअ ण एत्थ	७६	सच्चं जाणइ दट्ठुं	६
फुरिअं वामच्छि तुए	९	साहेंती सहि सुहअं	८७
बहलतमा हअराई	४४	सिहिपेहुणावअंसा	५५
बहुपुप्फभरावणमिअ-	१०३	सिहिपिच्छलुलिअकेसे	२०
बहुसो वि कहिज्जंतं	४७	सुव्वइ समागमिस्सइ	९९
बोल-सुणओ विवण्णो	९२	सूरच्छलेण पुत्तिएँ	२८
भण को ण रूसइ	८०	सेउल्लिअसव्वंगी	६०

भावदीपिकोक्त–

त्रिविक्रमसूत्रानुक्रमणिका

अपुण्णगाः क्तेन 39 [III. i. 132]

अहद्वा सुना 10 [II. 2. 91]

एण्हि एत्ताहे इदानीमः 7 [I. 3. 103]

एवमेवदेवकुलप्रावारकयावज्जीवितावटावर्तमानतावति वः 96 [I. 3. 94]

ओ पश्चात्तापसूचने 8 [II. 1. 60]

कः शक्तमुक्तदष्टमृदुत्वरुग्णेषु 63 [I. 4. 4.]

गभीरग इत् 1 [I. 2. 51]

गमिरणुवज्जावज्जसा° 22 [III. 1. 97]

घूर्णेर्घुम्मपहल्लघोलघुलाः 4 [II. 4. 142]

चर्नृतिमदिव्रजाम् 61 [II. 4. 49]

चः कृत्तिचत्वरे 83 [I. 4. 16]

छर्गमिष्यमासाम् 27 [II. 4. 50]

छादेर्णूमनुमोव्वालडक्कपव्वालसंतुमाः 34 [II. 4. 110]

छायायां होऽकान्तौ 22 [I. 3. 70]

तद्व्यत्ययश्च 100 [III. 4. 70]

तु समृद्ध्यादौ 5 [I. 2. 10]

दृप्ते ऽरिप्ता 58 [I. 2. 88]

दे संमुखीकरणे 18 [II. 1. 59]

दैवगेषु 12, 82 [I. 4. 92]

न वा तीर्थदुःखदक्षिणदीर्घे 9 [I. 4. 63]

नेः सदेर्मज्जः 15 [II. 4. 145]

पक्ष्मे मि 7 [I. 2. 31]

प्रतिगे ऽप्रतीपगे 2, 19 [I. 3. 33]

लुगव्ययत्यदाद्यात्तदचः 79 [I. 2. 3]

लो वा विद्युत्पत्रपीतान्धात् 15 [II. 1. 26]

वरइत्तगास्तृनाद्यैः 2, 16, 23, 37, 56 [II. 1. 30]

वा मधूके 85 [I. 2. 70]

वा से 71 [I. 4. 90]

शय्यादौ 15 [I. 2. 26]

संदिशो ऽप्पाहः 60 [III. 1. 112]

स्वयमो ऽर्थे अप्पणा 90 [II. 1. 70]

हे दक्षिणे ऽस्य 9 [I. 2. 9.]

भावदीपिकायाम्

अन्यग्रन्थेभ्य उध्दृतश्लोकानुक्रमणिका

अगूढमपरस्याङ्गं	१२	(काव्यप्रकाश, ५.४५-४६)
अतर्किते तु सहसा	४९	(अमरकोश, अव्ययवर्ग, २८६३)
अन्यथावस्थिता	१	(काव्यादर्श, २.२२१)
अयुज्यमानस्य मिथः	२५	(सरस्वतीकण्ठाभरण, २.४४)
अर्थान्तरप्रवृत्तेन	४६	(काव्यादर्श, २.३४८)
इदमुत्तममतिशयिनि	४	(cf. काव्यप्रकाश, १.४)
उद्योगानुसारिणी	२६	(cf. यत्नानुसारिणी लक्ष्मीः कीर्तिस्त्यागानुसारिणी ।)
कारणे सति कार्यानुत्पत्तिः	३८	
गुणीभूतो रसादिर्यत्र	२०	(cf. ध्वन्यालोक, २.५)
प्रतिषेधोक्तिराक्षेपः	५	(काव्यादर्श, २.१२०)
प्रसिद्धहेतुव्यावृत्त्या	१००	(cf. काव्यादर्श, २.१९९; सरस्वतीकण्ठाभरण, ३.९)
बुध्दैतस्य समीहितं	६	(cf. जयमङ्गला—वात्स्यायनकामसूत्र, ५.४)
यान्यसंभाषणव्याजात्	२१	
विवक्षा या विशेषस्य	३	(काव्यादर्श,२.२१४;सरस्वतीकण्ठाभरण,४.८१)
विवक्षितगुणोत्कर्षैः	३	(काव्यादर्श, २.३३०)

अन्यग्रन्थेषु उद्धृताः सप्तशतीसारस्थ-गाथाः

S. No.	Quotation	Name of the work	(पृष्ठांक:)	Observation
15	अत्ता एत्थ	काव्यानुशासनम्	(५३)	निषेधे विधिरूपो ध्वनिः ।
16	अहअं	,,	(१५५)	अस्फुटं व्यङ्ग्यम् ।
88	आसाइअं	,,	(५४)	निषेधें निषेधान्तररूपो ध्वनिः ।
89	उच्चिणसु	,,	(५५)	विधिर्निषेधयोर्निषेधान्तररूपो ध्वनिः।
7	कस्स व	,,	(५७)	वाच्याद् विभिन्नविषयत्वेन व्यवस्थापितो ध्वनिः ।
98	णोल्लेइ	,,	(६०)	अन्यासत्तिवैशिष्ट्यात् अर्थस्य व्यञ्जकत्वम् ।
86	णिअदइआ	,,	(५५)	विधिनिषेधयोर्विध्यन्तररूपो ध्वनिः ।
76	पंथअ ण	,,	(६७)	वाक्ये ध्वनिः ।
44	बहलतमा	,,	(५३)	विधौ विध्यन्तररूपो ध्वनिः।
58	भम धम्मिअ	,,	(४७)	विधौ प्रतिषेधरूपो ध्वनिः।
38	महिलासहस्स	,,	(१५५)	संदिग्धप्राधान्ये ध्वनिः ।
85	महुएहि	,,	(५४)	अविधिनिषेधे विधिरूपो ध्वनिः ।
94	मा पंथ	,,	(८४)	त्याद्यन्ते ध्वनिः ।
83	वाणियय	,,	(६३) (३९६)	व्यङ्ग्याद् ध्वनिः । परिसंख्यालंकारः ।
19	वाणीर	,,	(१५२)	व्यङ्ग्यात् वाच्यमेव सातिशयम्
87	साहेंती	,,	(६२)	अमुख्यस्य व्यञ्जकत्वम्
20	सिहि पिच्छ	,,	(४२५) (७२)	विच्छित्तिः ।
99	सुव्वइ	,,	(६१)	प्रस्तावाद् व्यञ्जकत्वम्

परिशिष्टम्

छप्पणयगाहाओ

(संस्कृतच्छाया च)

CHAPPAṆṆAYA-GĀHĀO OR THE GĀTHĀKOŚA

The *Kuvalayamālā* of Uddyotanasūri (A. D. 779), which is critically edited by me and lately published in the Singhi Jaina Series (Bhāratīya Vidyā Bhavana, Bombay 1959), contains three references (page 3, lines 18 and 25; page 177, line 2) to Chappaṇṇaya :

पालित्तय-सालाहण-छप्पण्णय-सीह-णाय-सद्देहिं ।
संखुद्ध-मुद्ध-सारंगओ व्व कह ता पयं देमि ॥

" How can I take any steps (or present any words by way of composition), being, like a simple deer, terrified by the roar of lions, namely Pālittaya, Sālāhaṇa and Chappaṇṇaya ? "

छप्पण्णयाण किं वा भण्णउ कइ-कुंजराण भुवणम्मि ।
अण्णो वि छेय-भणिओ अज्ज वि उवमिज्जए जेहिं ॥

" What need be said about Chappaṇṇayas, the prominent poets, with whom, even to this day, any other poet of clever sayings is compared in this world ? "

एवं इमाइँ एत्थं अण्णाइ मि होंति बहु-वियप्पाइं ।
छप्पण्णय-बुद्धि-वियप्पियाइँ मइ-वित्थर-कयाइं ॥

" Thus there are these and various other alternatives (of verbal tricks) fashioned or conceived by the intelligence of the Chappaṇṇayas and composed by their extensive wisdom. "

Studying these three verses together, it is clear that Chappaṇṇaya is not any individual author like Pālittaya and Sālāhaṇa. Chappaṇṇayas represented a community of outstanding poets whose clever utterances were looked upon as a standard. They were of alert intelligence and extensive wisdom, and further quite proficient in a variety of verbal tricks.[1] The way in which these tricks are introduced indicates that these Chappaṇṇayas were also known by the name Vidagdha.[2]

Mm. V. V. MIRASHI[3] was attracted by the first two gāthās of Uddyotana quoted by C. D. DALAL, years back, in his edition of Rājaśekhara's *Kāvya-mīmāṁsā*. While interpreting the first verse he adduced the following reference from the *Āvantisundarīkathā* :

सेतुरूपेण तिष्ठन्तो लोके सद्वस्तुदर्शिनः ।
षट्पञ्चाशत्प्रमाणत्वं गता नः कविपुङ्गवाः ॥

---

1 Some of them are illustrated in the *Kuvalayamālā* para 280, pp. 174 ff.

2 ता अण्णेण केण वि वियड्ढ-बुद्धि-परिकप्पिएण विणोएण अच्छामो त्ति । कुमारेण भणियं 'पिए सुंदरं संलत्तं, तत्थ वियड्ढ-प 'कप्पियाइं इमाइं विणोय-कारणाइं । तं जहा । पहेलिया etc.

3 Some Ancient Prākrit Poets, *Bhāratīya Vidyā*, Vol. X, pp. 42–8, Bombay 1949.

This led him to interpret that Chappaṇṇaya indicated a group of fifty-six eminent poets who had an insight into the real nature of things and attained the position of authority in their own sphere. Further, they have survived in this world in the form of Setu. He raises some probable questions whether the word Setu stands for the famous Prākrit Kāvya, *Setu-bandha* or *Rāvaṇavaho*, whether it was actually composed by fifty-six poets who fathered it upon the king Pravarasena (of the Vākāṭaka dynasty) who was ruling over Vidarbha in the 5th century A. D. He, However, rules out these possibilities, taking into consideration the uniform character of the *Setubandha*, like that of *Kumāra-saṁbhava* etc.; but proposes that Setu must have been another work of the type of an anthology, containing *subhāṣitas*, in which the poets by means of a few strokes depicted an interesting situation. In his opinion, there might have been such an anthology compiled in the Vākāṭaka age, possibly under the name of Setu; and some of its verses got incorporated into the earlier anthology of Hāla.

Whether the word Chappaṇṇaya used by Uddyotana really indicated fifty-six is a moot point. In fact, taking together all the three references of Uddyotana, it is more consistent that he has in view a group of poets known by the title Chappaṇṇaya. *i. e.*, Ṣaṭprajña. It is not unlikely that the author of the *Āvantisundarīkathā* misunderstood or differently understood the word Chappaṇṇaya and took it to mean 'fifty six ' just as Ratnaprabhasūri, in his Sanskrit *Kuvalayamālā-kathā*,[1] renders Chappaṇṇaya into Sanskrit as Ṣaṭkarṇa (p. *2, line 15) or Ṣaṭparṇa (see the corrupt various reading below, No. 15) and the report on the Cambay Ms., noted below, gives the name Ṣaṭparṇaka. The word *setu* might mean 'a landmark'; and these authors have survived as a 'landmark' in the sphere of poetry. Dr. V. RAGHAVAN has written an interesting note on the Ṣaṭprajña and has shown how, in course of time, its meaning gradually changed. His observations are reproduced below; and in the light of these Uddyotana's verses became all the more clear.

Dr. RAGHAVAN's note stands thus : " Somadeva[2] continues his description of rogues. He speaks of fourteen families of rogues of which the sixth family, he says, arose from the dust of the feet of Ṣaṭprajñas.

This is an interesting reference to a community of men of society whom both Ānandavardhana and Abhinavagupta refer to in their *Dhvanyāloka* and *Locana* (Uddyota IV, pp. 222-3, N. S. Press edition of 1928).

1 This is lately edited by me critically as a supplement to the ed. of the *Kuvalayamālā* (Singhi Jaina Series 45A), Bombay 1961.

2 Gleanings from Somadevasūri's Yaśastilakacampū, *Ganganatha Jha Research Institute Journal*, Vol. I, part 3, pp. 370–72, Allahabad 1944.

Ānandavardhana mentions these Ṣaṭprajñas in connection with cases of expressions where the charming *vācya* is primary '*mukhya*' and the *vyaṅga* is subordinated '*guṇībhūta*', and gives as illustrations the beautiful Prākrit verses on love composed by the Ṣaṭprajñas, Ṣaṭprajñādi-gāthās. Commenting on this in his *Locana*, Abhinavagupta says that these gāthās are called in this circles of Prākrit poets '*aaliā*'; and Ṣaṭprajñas are those Sahṛdayas who, living next door to each other and being well-versed in the world, meet together and exchange expressions of wit, lyrical stanzas etc. And Abhinavagupta cites as an example a gāthā of his own Guru, Bhaṭṭendurāja.

Dhvanyāloka (p. 222) :

यदा तु चाटुषु देवतास्तुतिषु वा रसादीनामङ्गतया व्यवस्थानं, हृदयवतीषु च षट्प्रज्ञादिगाथासु कासुचिद् व्यङ्ग्यविशिष्टवाच्यप्राधान्यम्।

Locana (pp. 222-23) :

हृदयवतीष्विति। 'अअलिया' इति प्राकृतकविगोष्ठ्यां प्रसिद्धासु त्रिवर्गोपायोपेयकुशलाः सहृदयाः षट्प्रज्ञाः प्रातिवेश्मका उच्यन्ते। तद्गाथा यथा भट्टेन्दुराजस्य—

लंघिअगअणा फलहीलआओ होंतु त्ति वडअंतीए।
ढ
हलिअस्सासिसं पाडिवेस .. .. .. ॥

अथ लङ्घितगगनाः कार्पासलता भवन्त्विति हालिकस्याशिषं वर्धयन्त्या प्रातिवेश्मिकः परनिर्वृतिं प्रापित इति चौर्यसंभोगाभिलाषणीयमित्यनेन व्यङ्गेन विशिष्टवाच्यामेव सुन्दरम्।

In a gāthā in the *Vajjalāggaṁ* (Bib. Ind. edn., pp. 58–59, No. 281) Vidagdha-paddhati, Ṣaṭprajña is used in the sense of a Vidagdha and an adept in the art of love-making :

[जइ कहवि ताण छप्पण्णयाण तुणुयंगि गोयरे पडसि।
ता थोरवसहदाहेक्कमंडिया दुक्करं जियसि ॥]
